दध्यात्रपकरण प्रवलोकाभिपवि
वरण सदिनार
४५१

नं. ४५१६
दशरूपककावलोकेन
२१ पन्नाओं
आचार्यश्री

काव्य दसरूपनाटक

१००२

४००

श्रीगणेशाय नमः। धुंडाक्कजमेन

॥ पुस्तकमिदं पाठकोपाह्वरामचन्द्रशर्मणः ॥

दशरू॰टी॰ १

श्रीगणेशायनमः॥ श्रीभरतायनमः॥ प्रणिपत्यशिवंसांबमाचार्यंभरतंतथा॰क्रियतेदशरूपस्यव्याख्यानंधनिकेनवै १ इहसदा
चारंप्रमाणयद्भिरविघ्नेनसमाप्त्यर्थमिष्टयोःप्रकृताभिमतयोर्देवतयोर्नमस्कारःक्रियतेश्लोकद्वयेन॰ नमइति।दशरूपेतिच।यस्यकं
ठःपुष्करायतेमृदंगवदाचरतिमहाभोगेनघनध्वानो निविडध्वनि नीलकंठस्यशिवस्यतांडवेउद्धतेनृत्येतस्मैगणेशायनमः अत्रचरवंड

श्रीगणेशायनमः नमस्तस्मैगणेशाययत्कंठःपुष्करायते॰महाभोगघनध्वानोनीलकंठस्य
तांडवे १ दशरूपानुकारेणयस्यमाद्यंतिभावुकाः नमःसर्वविदेतस्मैविष्णवेभरतायच २

श्लेषाक्षिप्तमालोपमाछायालंकारः॥ नीलकंठस्यमयूरस्यतांडवेमंद्रमेघध्वनिर्यथापुष्करायते इतिप्रतीतेः ६। दशरूपेमेकत्रमत्स्य शिव
कूर्मादिप्रतिमारूपेणाम्यत्रानुकृतिरूपनाटकादिनायस्यभावुकाध्यातारोरसिकाश्चमाद्यंतिहृष्यंतितस्मैविष्णवेऽभिमतायप्र १
कृतायभरतायचनमः २

अथ श्लोकप्रवृत्तिनिमित्तं दर्शयति। कस्यचिदिति। अंकं चिह्नं विषयं प्रकरणादिरूपं नाटकादिकं कदाचिदेव द्दयया कस्यचिद्देवकवेः स
रस्वती योजयति। येन प्रकरणादिना विषयेनान्योपि जनो विदग्धो भवति २ स्वप्रवृत्तेर्विषयं दर्शयति उद्धृत्येति पन्नाद्यवेदं देवेभ्यः

कस्यचिद्देव कदाचिद्दयया विषयं सरस्वती विदुषः। घटयति कमपि तमन्यो व्रजति जनो येन वैदग्धीम् २ उद्धृ
त्योद्धृत्य सारं यमखिल निगमान्नाट्यवेदं विरिंचिश्चक्रे यस्य प्रयोगं मुनिरपि भरतस्तांडवं नीलकंठः। शर्वा
णी लास्यमस्य प्रतिपदमपरो लक्ष्म कः कर्तुमीष्टे नाट्यानां किंतु किंचित्प्रगुणरचनया लक्षणं संक्षिपामि ४

सारमादाय ब्रह्मा हृतवान् यत्संबंधेन मभिनयं भरतश्चकार करणांगहारान् अकरोत् हरस्तांडवमुद्धतं लास्यं सुकुमारं तत्तं
पार्वती अस्य सामस्त्येन लक्षणं कर्तुं कः शक्तः तदेकदेशस्य दशरूपकस्य लक्षणसंक्षेपः क्रियत इत्यर्थः ४

द॰रू॰टी॰
२

विषयैक्यप्रसक्तं पौनरुक्त्यं परिहरति। व्याकीर्णे इति व्याकीर्णे विक्षिप्ते विस्तीर्णे च शास्त्रे अल्पबुद्धीनां पुंसां मतिमोहो भवति तेनास्य नाट्यवेदस्यार्थस्तत्पदैरेव संक्षिप्य ऋजुवृत्त्या क्रियत इति इदं प्रकरणं दशरूपकज्ञानफलं दशरूपकं किंफलमित्याह आनंदेति अत्र केचिद्धर्मार्थकाममोक्षेषु वैलक्षण्यं कलासु च करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणमित्यादिना त्रिवर्गादि

व्याकीर्णे मंदबुद्धीनां जायते मतिविभ्रमः तस्यार्थस्तत्पदैरेव संक्षिप्य क्रियतेऽञ्जसा ५ आनंदनिस्यंदिषु रूपकेषु व्युत्पत्तिमात्रं फलमल्पबुद्धिः योऽपीतिहासादिवदाह साधुस्तस्मै नमः स्वादुपराङ्मुखाय ६

व्युत्पत्तिं काव्यफलत्वेनेच्छंति तन्निरासेन स्वसंवेद्यः परमानंदरूपो रसास्वादो दशरूपाणां फलं न पुनरितिहासादिवत्त्रिवर्गादि व्युत्पत्तिमात्रमिति दर्शितम् नम इति सोल्लुंठम्॥६॥ शिव
२

नाट्यानां लक्षणं संक्षिपामीत्युक्तं किं पुनस्तन्नाट्यमित्याह अवस्थेति· काव्योपनिबद्धधीरोदात्ताद्यवस्थानुकारश्चतुर्विधाभिनयेन तादात्म्यापत्ति र्नाट्यम् रूपमिति तदेव नाट्यं दृश्यमानतया रूपमित्युच्यते नीलरूपादिरूपवत् नटे रामाद्यवस्थारोपेण रूपकं मुखचन्द्रादिवत् इत्येकस्मिन्नर्थे प्रवर्तमानस्य शब्दत्रयस्येन्द्रः शक्रः पुरंदर इतिवत्प्रवृत्तिनिमित्तभेदो दर्शितः। दशधैवेति· रसानाश्रित्य वर्तमानं दशप्रकारमेवेत्यवधारणं शुद्धाभिप्रायेण नाटिकायाः संकीर्णत्वेन वक्ष्यमाणत्वात् ७ तानेव दश भेदानुद्दिशति नाटकमिति ८ ननु डोम्बी श्रीगदितं भाणो भाणी प्रस्थानं रासकः

अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते रूपकं तत्समारोपाद्दशधैव रसाश्रयम् ७ नाटकं सप्रकरणं भाणः प्रहसनं डि
मः व्यायोगसमवाकारौ वीथ्यङ्केहामृगा इति ८ अन्यद्भावाश्रयं नृत्यं नृत्तं ताललयाश्रितम्॥

काव्यं च सप्तनृत्यस्य भेदाः स्युस्तेऽपि भाणवदिति रूपकान्तराणामपि संभवादवधारणानुपपत्तिरित्याशङ्क्याह अन्यदिति रसाश्रयान्नाट्याद्भावाश्रयं नृत्यमन्यदेव तत्र भावाश्रयमिति विषयभेदात् नृत्यमिति नृतेर्गात्रविक्षेपार्थत्वेनाङ्गिकबाहुल्यात् तत्कारिषु च नर्तकव्यपदेशाल्लोकेऽपि रंगप्रेक्षणीयकमिति व्यवहारान्नाटकादेरन्यन्नृत्यं तद्भेदत्वाच्छ्रीगदितादेरवधारणोपपत्तिः। नाटकादि च रसविषयं रसस्य च पदार्थीभूतविभावादिसंसर्गा॥

द०रू०टी० त्मकवाक्यार्थरूपत्वाद्वाक्यार्थाभिनयात्मकत्वं रसाश्रयमित्यनेन दर्शितं नाट्यमिति चनट अवस्पंदने इति नटेः किंचिच्चलनार्थत्वात्सात्विकबाहुल्य
३ मत एव तत्कारिषु नट इति व्यपदेशः यथा च गात्रविक्षेपार्थत्वे समानेप्यनुकारात्मकत्वेन नृत्तादन्यन्नृत्यं तथा च वाक्यार्थाभिनयात्मकान्नाट्यात्
पदार्थाभिनयात्मकमन्यदेव नृत्यमिति प्रसंगान्नृत्तं व्युत्पादयति नृत्तमिति तालश्चंचत्पुटादिः लयो द्रुतादिः तन्मात्रापेक्षोऽङ्गविक्षेपोऽभिनयशू
न्यो नृत्तमिति । अनन्तरोक्तं द्वयं व्याचष्टे आद्यमिति नृत्यं पदार्थाभिनयात्मकं मार्ग इति प्रसिद्धं नृत्तं देशीति ॥ द्विविधस्यापि द्वैविध्यं दर्शय

आद्यं पदार्थाभिनयो मार्गो देशी तथा परं ॥ मधुरोद्धतभेदेन तद्द्वयं द्विविधं पुनः लास्यतांडवरूपेण नाट्याद्युपकारकम् १०
वस्तु नेता रसस्तेषां भेदको वस्तु च द्विधा तत्राधिकारिकं मुख्यमंगं प्रासंगिकं विदुः ११

ति मधुरेति सुकुमारं द्वयमपि लास्यमुद्धतं द्वितयमपि तांडवमिति प्रसंगे प्रसंगस्योपयोगं दर्शयति रूपमिति द्वयं तच्च नाटकाद्युपकारकमि
ति नृत्यस्य क्वचिदवान्तरपदार्थाभिनयेन नृत्तस्य च शोभाहेतुत्वेन नाटकादावुपयोग इति १० अनुकारात्मकत्वेन रूपकाणामभेदात्किं
कृतो भेद इत्याशंक्याह वस्त्विति नेतृभेदान्नायकभेदाद्रसभेदाद्रूपाणामन्योन्यं भेद इति वस्तुभेदमेवाह द्विधेति कथमित्याशंक्या २
ह तत्रेति प्रधानभूतमाधिकारिकं यथा रामायणे रामसीतादिवृत्तांतः तदंगभूतं प्रासंगिकं यथा तत्रैव सुग्रीवविभीषणादिवृत्तांत इति ११

=यथा रामाभ्युदये द्वितीयेङ्के विराधगुहशबर्योर्मरुतीसंवादकथा पताका चतुर्थेङ्के राक्षससंवादरूपान्या कथा प्रकरी चोक्ता ४=

निरुक्त्याधिकारिकं दर्शयति अधिकार इति फले स्वस्वामिसंबंधोधिकारः फलस्वामी चाधिकारी तेनाधिकारिणा निर्वृत्तं फलपर्यंतत्तानीयमा
नमितिवृत्तमाधिकारिकं १२ प्रासंगिकं निर्वक्ति प्रासंगिकमिति यस्येतिवृत्तस्य परप्रयोजनस्य सतस्तत्प्रसंगात्स्वप्रयोजनसिद्धिस्तत्प्रा
संगिकमिति वृत्तं प्रसंगनिर्वृत्तेः प्रासंगिकमपि पताकाप्रकरीभेदाद्विविधमित्याह सानुबंधमिति दूरं यदनुवर्तते प्रासंगिकं सा पताका सुग्री
वादिवृत्तवत् पताकेवासाधारणनायकचिह्नवत्तदुपकारित्वात् यदल्पं सा प्रकरी श्रवणादिवृत्तांतवत् १३ पताकाप्रसंगेन पताकास्थान

अधिकारः फले स्वाम्यमधिकारी च तत्प्रभुः तन्निर्वर्त्यमभिव्यापि वृत्तं स्यादाधिकारिकं १२ प्रासंगिकं परार्थस्य स्वार्थो यस्य प्रसंग
तः सानुबंधं पताकाख्यं प्रकरी च प्रदेशभाक् १३ प्रस्तुतागंतुभावस्य वस्तुनोन्योक्तिसूचकं पताकास्थानकं तुल्यसंविधानविशे
षणम् १४ प्रख्यातोत्पाद्यमिश्रत्वभेदात्त्रेधापि तत्त्रिधा प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम् १५

कं सूत्रयति प्रस्तुतेति प्राकरणिकस्य भाविनोर्थस्य सूचकं रूपकं पताकावद्भवतीति पताकास्थानकं तत् तुल्येतिवृत्ततया तुल्यविशे
षणतया च द्विप्रकारमन्योक्तिसमासोक्तिभेदात् यथा यातोस्मि पद्मनयने समयो ममैष सुप्ता मयैव भवती प्रतिबोधनीया । प्रत्यायना
मयमितीव सरोरुहिण्याः सूर्योस्तमस्तकनिविष्टकरः करोति यथा च तुल्यविशेषणतया उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृंभां क्षणा
दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं पश्यन्कोपविपाटलद्युतिमुखं देव्याः करिष्याम्य
हम् १६ आधिकारिकद्विविधप्रासंगिकभेदात्त्रिविधस्यापि त्रैविध्यमाह प्रख्यातेति १५

द·रू·टी·
४

५

मिश्रं चेति तस्येति वृत्तस्य किं फलमित्यात कार्यमिति धर्मार्थकामाः फलं तच्च शुद्धमेकैकमेकानुबद्धं द्व्यनुबद्धं वा १६ तत्साधनं व्युत्पादय
ति स्वल्पेति स्तोकोद्दिष्टः कार्यसाधकः पुरस्तादनेकप्रकारं विस्तारी हेतुविशेषो बीजवद्बीजं यथा रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुर
नुकूलदैवो यौगंधरायणव्यापारो विष्कंभके न्यस्तः। एवमत्र कः संदेहः द्वीपादन्यस्मादपीति परतीत्यादिना प्रारंभेस्मिन्स्वामिनो वृद्धिहे
तावित्यन्तेन यथा च वेणीपांद्रौपदीकेशसंयमनहेतुर्भीमक्रोधोपचितो युधिष्ठिरोत्साहो बीजं। यथा च मुद्राराक्षसे। चंद्रगुप्तमललक्ष्मीस्थैर्यफले
कस्य राक्षससंग्रहरूपकार्यस्य हेतुरनुकूलदैवश्चाणक्यनीतिप्रयोगो बीजमिति तच्च महाकार्यावांतरकार्यहेतुभेदादनेकप्रकारमिति अ

मिश्रं च संकरात्ताभ्यां दिव्यमर्त्यादिभेदतः कार्यं त्रिवर्गस्तच्छुद्धमेकानेकानुबंधि वा १६ स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्यनेकधा
अवांतरार्थविच्छेदे बिंदुरछेदकारणम् १७ बीजबिंदुपताकाख्यप्रकरीकार्यलक्षणाः अर्थप्रकृतयः पंच ता एताः परिकीर्तिताः १८

वांतरबीजस्य संज्ञांतरमाह अवांतरार्थेति यथा रत्नावल्यां अवांतरप्रयोजनानंगपूजापरिसमाप्तौ कार्यार्थविच्छेदे सत्यनंतरकार्यहेतु
रुदयनस्येंदोरिवोद्वीक्षते सागरिका श्रुत्वा कहं एसो उदयणराअस्सिंदो। जस्स अहं तादेण दिण्णा इत्यादि। यथा मुद्राराक्षसे राक्षसः पत्रं
गृहीत्वा स्वगतं किमत्र लिखितमित्यादि यमपटचरवृत्तांते न विच्छिन्ने स्यांतरितस्य बीजस्य पुनः प्रवर्तनात् बिंदुर्जले तैलबिंदुवत्प्रसृतत्वात् १७
रदार्थौ पताकाद्यप्रसंगाच्युत्क्रमो ऽक्रमार्थमुपसंहरन्नाह। बीजेत्यादि। अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः १८ चाणक्यः २

शिव
४

चाणक्यः ३

अन्यदवस्थापंचकमाह अव[stain]स्थाः इति १९ यथोद्देशं लक्षणमाह औत्सुक्यमिति इदमहं संपादयामीत्यध्यवसायमात्रमारंभ इत्युच्यते
यथा रत्नावल्यां प्रारंभेस्मिन्स्वामिनो वृद्धिहेतौ दैवे चेत्थं दत्तहस्तावलंबे इत्यादिना सचिवायत्तसिद्धेर्वत्सराजस्य कार्यारंभो यौगंधरायणमुखे
न दर्शितः यथा च मुद्राराक्षसे प्रथमेंके राक्षसः ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते तं गच्छन्त्यनु ये विपत्तिषु पुनस्ते तत्प्रतिष्ठाशया भर्तु नर
र्ये प्रलयेपि पूर्व[stain]सुकृतासंगेन निःसंगया भक्त्या कार्यधुरं वहति वहवस्ते दुर्लभास्त्वादृशाः अत एवास्माकं तत्संग्रहे यत्न इति अथ प्रयत्नः प्रय

अवस्थाः पंचकार्यस्य प्रारब्धस्य फलार्थिभिः आरंभयत्नप्राप्त्याशानियताप्तिफलागमाः १९ औत्सुक्य
मात्रमारंभः फललाभाय भूयसे प्रयत्नस्तु तदप्राप्तौ व्यापारोतित्वरान्वितः २०

त्न इति तस्य फलस्याप्राप्तौ उपाययोजनादिरूपः चेष्टाविशेषः प्रयत्नः यथा रत्नावल्यां आलेख्याभिलेखनादिर्वत्सराजस्य समागमोपा
यः सागरिका तहवि ण अत्थि अण्णो दंसणोवाओ त्ति जहा जहा आलिहिय जहासमीहिदं करिस्सम्मि इत्यादिना प्रतिपादितः यथा वा मुद्रा
राक्षसे स्वच्छंदमेकचरमुज्ज्वलदानशक्तिमिति प्रथमांकांतपद्ये राक्षससंग्रहरूप उपायश्चाणाक्येनोक्तः २०

प्राप्त्याशामाह उपायेति उपायस्यापायशंकया चाभावादनिर्धारितैकांतफलप्राप्तिः प्राप्त्याशा· यथा रत्ना· तृतीयेंऽके वेषपरिवर्ताभिसरणा
दौस[..]मागमोपायेन वासवदत्तालक्षणापायशंका विदू· एवं जइ अआलवादावली विअ· आगच्छिअ· अण्णदो· णइस्सदि वासवदत्ता इत्यादि अ२
नादर्शितत्वात्· अनिर्धारितैकांतसमागमप्राप्तिरुक्ता यथा वा मुद्राराक्षसे द्वितीयेंऽके आहितुंडिकवेषधारिणो विराधगुप्तस्योक्तिः त्वगनं संस्कृतसमम
भ्रिसेत्यादिना कौटिल्यधीरज्जुनिबद्धमूर्तिमिति मन्ये नोपायशंका राक्षसेन निकृष्यमाणामिति मन्ये न चैकस्मिन्नेव पद्ये अपायशंका च ताप्त्याशा

उपायापायशंकाभ्यां प्राप्त्याशा प्राप्तिसंभवः अपायाभावतः प्राप्तिर्नियताप्तिः सुनि
श्चिता २१ समग्रफलसंपत्तिः फलयोगस्तथोदितः॥

से मौर्यलक्ष्मी स्थैर्यरूपायाः संभवः नियताप्तिमाह अपायाभावतः प्राप्तिर्नियताप्तिः सुनिश्चितेति अपायाभाव अवधारितैकांतफलप्रा
प्तिरिति यथा रत्नावल्यां विदूषकः साअरिआ उण दुक्करं जीविस्सदी सुपञ्चम्य किं णु उवाअं चिंतेसि त्वनंतरं राजा वयस्य देवीप्रसादनं मु
क्त्वा नान्यमत्रोपायं पश्यामीत्यनंतरं कार्थविंदुनानेन देवीलक्षणापायस्य प्रसादनेन निवारणात् नियताफलप्राप्तिः सूचिता २१ ५
फलयोगमाह समग्रेति यथा रत्नावल्यां रत्नावलीप्राप्तिः चक्रवर्तित्वावाप्तिश्च यथा मुद्राराक्षसे राक्षससंग्रहेण मौर्यलक्ष्मीस्थैर्यम्॥

अथ संधिलक्षणमाह · अर्थप्रकृतय इति · अर्थप्रकृतीनां यथासंख्येनावस्थाभिः पंचभिर्योगाद्यथाक्रमेण वक्ष्यमाणा मुखाद्याः पंच संधयो जायंते · २२। संधिसामा
न्यलक्षणमाह · अंतरैकार्थेति · एकेन प्रयोजनेनान्वितानां कथांशानामवांतरैः प्रयोजनसंबंधः संधिः। के पुनस्ते संधय इत्याह · मुखमिति · २३। यथोद्देशं ल
क्षणमाह · मुखं बीजेति · बीजानां समुत्पत्तिरनेकप्रकारप्रयोजनस्य रसस्य च हेतुर्मुखसंधिरिति व्याख्येयं · तेन त्रिवर्गफले प्रहसनादौ रसोत्पत्तिहेतोरेव
बीजत्वमिति · यथा मुद्राराक्षसे प्रथमेंके चंद्रगुप्तानंतरभ्यनिष्क्रांत इति पर्यंतं नानार्थरससंभवा बीजसमुत्पत्तिर्निरूपिता · २४। अस्य च बीजार्थयुक्तानि द्वाद
शांगानि भवंति · तान्याह · उपक्षेप इति सार्द्धेन · २५। एतेषां स्वसंज्ञाव्याख्यातानामपि सुखार्थं लक्षणमाह · बीजन्यास इति · यथा रत्ना · नेपथ्ये · द्वीपादपीत्यादिना यौ

अर्थप्रकृतयः पंच पंचावस्थासमन्विताः। यथासंख्येन जायंते मुखाद्याः पंच संधयः। २२। अंतरैकार्थसंबंधः संधिरेकान्वये सति · मुखं प्रति
मुखं गर्भः सावमर्शोपसंहृतिः। २३। मुखं बीजसमुत्पत्तिर्नानार्थरससंश्रया · अंगानि द्वादशैतस्य बीजारंभसमन्वयात् · २४ उपक्षेपः परिक
रः परिन्यासो विलोभनं युक्तिः प्राप्तिः समाधानं विधानं परिभावना · २५। उद्भेदभेदकरणान्यन्वर्थान्यथ लक्षणं · बीजन्यास उपक्षेपस्तद्बाहु
ल्यं परिक्रिया · २६

गंधरायणेन वत्सराजस्य रत्नावलीप्राप्तिहेतुभूतमनुकूलदैवं स्वव्यापारं बीजत्वेनोपक्षिप्तवान् · यथा वा वेण्यां · लाक्षागृहानलवि
षान्नसभाप्रवेशैरित्यादिना बीजस्य न्यास उपक्षेपः। परिकरमाह · तद्बाहुल्यमिति · यथा रत्नावल्यां · अन्यथा क्व सिद्धादेशप्रत्ययप्रार्थितायाः सिंहलेश्वरदु
हितुः समुद्रे प्रवहणभंगमग्नोत्थितायाः फलकासादनमित्यादिना सर्वथा स्पृशंति नः स्वामिनमभ्युदया इत्यंतेन बीजस्यैव बहूकरणात् · यथा वा वेण्यां · प्र
वृद्धं यद्वैरं मम खलु शिशोरेव कुरुभिरिति पद्येन · यथा वा मुद्राराक्षसे · येन मयान्समुत्थवानानंदाद्यस्यनेन पद्येन चंद्रगुप्तलक्ष्मीस्थैर्यसादनहेतोर्बीजस्य बाहुल्य

द॰रू॰टी॰

६

परिन्यासमाह॰ तदिति॰ यथा रत्नावल्यां॰ प्रारंभेऽस्मिन्स्वामिनः इति पद्येन यौगंधरायणः स्वव्यापारदैवतयोर्निष्पत्तिमुक्तवानिति॰ यथा वा मुद्राराक्षसे प्रथमेंके न किंचिसरि
णस्यतेसर्वंसमाहितमितिपद्ये॰ सर्वैरुपायैर्बीजस्यन्यासात्परिन्यासः॥ विलोभनमाह॰ गुणाख्यानमिति॰ यथा रत्नावल्यां॰ अस्तापास्तेतिपद्ये वैतालिकमुखेन चंद्रतुल्यव
त्सराजगुणवर्णनया सागरिकायाः समागमहेत्वनुरागबीजानुगुण्येनैव विलोभनाद्विलोभनं॰ यथा वा मुद्राराक्षसे॰ ऐश्वर्यादनपेतमितिपद्येन राक्षसगुणवर्णनाद्वि
लोभनं॰ यथा च वेणीसंहारे प्रथमेंके॰ मंथायस्तार्णवांभःप्लुतकुहरमितिरितेनद्रौपद्या विलोभनं॰ अथ युक्तिः॥ संप्रधारणमिति॰ यथा रत्नावल्यां प्रथमेंके॰ मयापि चै
नां देवीहस्ते सबहुमानं निक्षिपतेत्यारभ्य कृतमेवतो मिलितइसंतेन सागरिकाया अंतःपुरगताया वत्सराजस्य सुखेन दर्शनादिप्रयोजनावधारणं द्वः वा

तन्निष्पत्तिः परिन्यासो गुणाख्यानं विलोभनं॰ संप्रधारणमर्थानां युक्तिः प्राप्तिः सुखागमः॥२७॥

अत्र सिंहलेश्वरामासयोश्वनायकसमागम[redacted]रेतुप्रयोजनत्वेनावधारणाद्युक्तिः॥ यथा वा मुद्राराक्षसे प्रथमेंके॰ भद्रनावद्रुषलेत्यारभ्य प्रमाद्य मिथ्यामी संतः
मंदभोबीजानुगुणसंघट्टनप्रयोजनस्य विचारो युक्तिः॥ प्राप्तिमाह॰ प्राप्तिरिति॰ यथा वेणीसंहारे प्रथमेंके॰ चेटी भट्टिणि परिकुविदो विअ कुमालो लक्खीअदि॥ सुपक्ष्मे॰ भी
मः॥ मन्थामि कौरवशतमिति पद्यानंतरं॰ द्रौपदी॰ श्रुत्वा सहर्षं॰ णाध अस्सुदपुव्वं खु एदं वअणं ता पुणो विभण॥ इत्यनेन भीमक्रोधबीजान्वयेनैव सुखप्रा
प्तिरिति॰ यथा वा रत्नावल्यां प्रथमेंके॰ सागरिका॰ श्रुत्वा सहर्षं परिवृत्य सस्पृहं पश्यंती॰ कधं॰ अअं॰ सो॰ राआ॰ उदअणो॰ जस्स॰ तादेण॰ अहं॰ दिण्णा॰ ता॰ परप्पेसणदूसिअं मे पिअ ६
जीविदं एदस्स दंसणेण बहुमदं संवुत्तं॰ इति सागरिकायाः सुखावगमात्प्राप्तिरिति॰ २७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अथसमाधानंलक्षयति·बीजागमइति·यथारत्नावल्यांप्रथमेंके·वासवदत्ता·तेणहिउवणेहिउवअरणाईइत्याद्युपक्रमे·सागरिका·स्वगतं·सारिआदावसुसंगदा
एहत्थेसमप्पिदा·पेक्खिदुं उणमेकुदूहलंताअलक्खिदापेक्खिस्सं·इसनेनवासवदत्तयारत्नावलीवत्सराजयोर्दर्शनप्रतीकारा त्सागरिकायाःसुसंगताहस्तार्प
णेनालक्षितप्रेक्षणेनचवत्सराजसमागमहेतोर्बीजस्योपादानात्समाधानं·यथावावेण्यांप्रथमेंके·भीमः।भवतिपांचालराजतनयेश्रूयतां·अयमचिरेणैवकोजेन
चंचद्भुजेतिपद्येनवेणीसंहारहेतोःक्रोधबीजस्यपुनरुपादानात्समाधानं·[redacted] विधानमाह·विधानंसुखदुःखकृदिति·यथामालत्यांप्रथमेंके·माधवः
यांसात्सुहुर्वलितेतिपद्येस्मयान्तिमितेसनेनचमालत्यवलोकनस्यसानुरागस्यसमागमहेतोर्बीजानुगुणेननेवमाधवस्यसुखदुःखकारित्वाद्विधानं·यथावा

बीजागमःसमाधानंविधानंसुखकृत्स्मृतम्॥

वेण्यांप्रथमेंके·द्रौपदी·णाहपुणोविअइंतुएआगच्छिअसमासासिदव्वा·भीमः·ननुपांचालराजतनयेकिमयाप्यलीकाश्वासनया·भूयःपरिभवक्लांतिलज्जावि
धुरिताननं·अनिःशेषितकौरव्यंनपश्यसिवृकोदरं·इतिसंग्रामस्यसुखदुःखहेतुत्वाद्विधानं·यथावारत्नावल्यां·सागरिकाराजानंदृष्ट्वासस्पृहंनिश्व
स्य·णमेमंदभाअधेआएअदिट्ठिरंपेक्खिदुंविअअंपाविदो·इतिप्रथमदर्शनसुखस्यानंतरंदुःखस्यचाविधानात्·यथावामुद्राराक्षसेप्रथमेंके·चाणक्य
ःशत्रुप्रयुक्तानांचतीक्ष्णरसदायिनामित्यारभ्यतत्रावहितउपक्रमाइत्यंतंबीजस्यसुखदुःखहेतुर्विधानं॥ ॥०॥ ॥०॥ ॥०॥

अथपरिभावना·परिभावइति·यथारत्नावल्यांप्रथमेंके·सागरिका·दृष्ट्वासविस्मयं·कहंपच्चक्खोजेवअणंगोपूअंपडिच्छेदिताअहंपिइत्थट्ठिदाज्जेवपूअंणिव्वत्तइस्सं·इत्यनेनवत्सरा
जस्यानंगरूपतयाअपह्नवादनंगस्यप्रत्यक्षस्यपूजाग्रहणस्यलोकोत्तरत्वादद्भुतरसावेशःपरिभावना·यथावेणीसंहारेप्रथमेंके·द्रौपदी·किंदाणिंएसोपलअजलहरत्थणिदमंस
लोदंसवणेक्खणेपलउं·दुंदुहीताडीअदिइतिलोकोत्तरसमरदुंदुभिरसावेशाद्द्रौपद्याःपरिभावना·उद्भेदमाह·उद्भेदइति·यथारत्नावल्यांप्रथमेंके·वत्सराजस्यकुसुमायुधव्यपदेशोनि
गूढस्यवैतालिकवचनादस्तापास्त्तोसादिमोदयनस्येत्यनेनबीजानुगुण्येनैवोद्भेदनादुद्भेदः·यथाचवेणीसंहारेप्रथमेंके·आर्यकिमिदानीमध्यवसितंगुरुणादिसुपक्रमेनेपथ्ये·यत्स
त्यव्रतभंगेतिपद्यानंतरं·भीमः·सहर्षंजंभता·र·विनयंधरसंप्रसन्नतिहतमत्सरमार्यस्यक्रोधज्योतिरितिंतेनच्छन्नस्यद्रौपदीकेशसंयमनहेतोर्युधिष्ठिरक्रोधबीजस्योद्भे

परिभावोऽद्भुतावेशउद्भेदोगूढभेदनम्·२८·करणंप्रकृतारंभो

दनादुद्भेदः·२८·करणमाह·करणमिति·यथारत्नावल्यांप्रथमेंके·णमोदेकुसुमाउहअमोहदंसणेमेकुविस्सासिसितु·दिट्ठंजंपेक्खिदव्वंताजावअज्जो णमंकोविपेक्खइताणगमिस्सं
मित्यनेनानंतरांकप्रस्तुतानिर्विघ्नदर्शनारंभकरणात्करणं·यथावावेणीसंहारेप्रथमेंके·भीमः·ततांचालिगच्छामोवयमिदानींकुरुकुलक्षयायेति·सहदेवः·आर्यगच्छामस्तत्र
गुरुजनानुज्ञाताआत्मविक्रमानुरूपमाचरितुंइत्यनेनानंतरांकप्रस्तूयमानसंग्रामारंभकरणात्करणं·यथावाकुशराजस्येप्रथमेंके·यथोद्देशंक्रियतइत्सारभ्य
भविष्यतीत्यनंतबीजानुकूलप्रस्तुतकार्यारंभःकरणं·सर्वत्रोद्देशप्रतिनि[illegible]वैषम्यंक्रियाक्रमस्याविवक्षितत्वादिति॥ ७

अथभेदमाह· भेद इति· यथा वेणीसंहारे प्रथमेंके· द्रौपदी· णाह मा क्खु जण्णसेणी परिहवुद्दीविदकोवाणला अणवेक्खिदसरीरा परिक्कमिस्सथ· जदो अप्पमत्तसंचरणीआ

इं रिवुबलाइं सुणीअंति· भीमः· अपि शुक्षत्रियं· अन्योन्यतीसं तेन विपन्नायाः द्रौपद्याः क्रोधोत्साहबीजानुगुण्यैनैव प्रोत्साहनाद्भेद इति· यथा वा मुद्राराक्षसे प्रथ

मेंके अभावेन च का[redacted]तरेण तिपर्यं चाणक्येन राक्षसगुणस्य प्रोत्साहनाद्भेदः। एतानि च द्वादश मुखांगानि बीजारंभस्य द्योतकानि साक्षात्पारंपर्येण वा

विधेयानि· एतेषामुपक्षेपपरिन्यासयुक्त्युद्भेदसमाधानानामवश्यंभावितेति मुखसंधिः। अथ सांगं प्रतिमुखसंधिमाह· लक्ष्यालक्ष्य इवेति· तस्य बीजस्य किंचि

ल्लक्ष्यः किंचिदलक्ष्य इवोद्भेदः प्रकाशनं तत्प्रतिमुखं· यथा रत्नावल्यां द्वितीयेंके वत्सराजसागरिकासमागमहेतोरनुरागबीजस्य प्रथमांकोपक्षिप्तस्य सुसंगता

भेदः प्रोत्साहना मता· लक्ष्यालक्ष्य इवोद्भेदस्तस्य प्रतिमुखं भवेत्· २९॥

विदूषकाभ्यां ज्ञायमान[redacted]तया लक्ष्यस्य वासवदत्तया च चित्रफलकवृत्तांतेन किंचिदुन्नीयमानस्य दृश्यरूपतयोद्भेदः प्रतिमुखसंधिः। यथा वा[redacted]वे

णीसंहारे द्वितीयेंके भीष्मादिवधेन लक्ष्यस्य कर्णादिवधादलक्ष्यस्य भीमक्रोधबीजस्योद्भेदः सहभृत्यगणं सबांधवं सहमित्रं ससुतं सहानुजं· स्वबलेन निहंति

संयुगे न चिरात्पांडुसुतः सुयोधनम् इत्यादिभिः दुःशासनस्य हृदयक्षतजांबुपाने दुर्योधनस्य च यथा गदयोरुभंगे· तेजस्विनां समरमूर्ध्नि पांडवानां

याजयद्रथवधोपि तथा प्रतिज्ञातः सेवमादिभ्यश्चोद्भेदः प्रतिमुखसंधिः। यथा वा मुद्राराक्षसे प्रथमेंके पूर्वं लक्षितस्य चाणक्यस्य मध्ये यमपटवृत्तांतेनालक्षितस्य

चाणक्यनीतियोगबीजस्य पुनरत्र सपत्नविंदुसंबंधस्य च मेलनात्· २९॥

द॰रू॰टी॰

८

४

बिंदुरिति॰ अस्य च पूर्वोक्तोपक्षिप्त बिंदुरूप बीज प्रयत्नार्थानुगतान्यत्रयोदशांगानि भवंति तान्याह॰ विलास इति॰ नर्मद्युतिरिति च॰ ३०॥ ३१॥ यथोद्देशं लक्षणमाह॰ र
त्यर्थेहेति॰ यथा रत्नावल्यां द्वितीयेंके॰ सागरिका॰ हिअअ प्पसीद इमिणा आआसमेत्तफलेण दुल्लहजणाणुबंधेण सारम्भ तह वि आलेक्खगदं वि तं जणं कदुअ जधा
समीहिदं करिस्सं॰ तह दिनस्स दंसणेण वा ओ आलेखणस्सि निश्चयेनैवं वत्सराजसमागमरतिं चित्रादिजन्यामपुद्दिश्य सागरिकायाश्चेष्टास्याः प्रयत्नानुरागबी
जानुगो विलास इति॰ यथा वा मुद्राराक्षसे प्रथमेंके चरवचनानंतरं प्रतीहार्या जयशब्दे उक्ते गृहीतो जयशब्द इति चाणक्यस्य कार्यसिद्धिविषयमनोविलासः॥ अ
थ परिसर्पमाह॰ दृष्टेति॰ यथा वेण्यां द्वितीयेंके कंचुकी॰ योयमुद्धतेषु बलवल्लियसारम्भ॰ आशस्त्रग्रहणादकुंठपरशोस्तस्यापि जेता मुनेस्तापायास्य न पांडुसूनुभि

बिंदुप्रयत्नानुगमादंगान्यस्य त्रयोदश॰ विलासः परिसर्पश्च विधूतं शमनर्मणी॰ ३०॥ नर्मद्युतिः प्रगमनं नि
रोधः पर्युपासनं॰ वज्रं पुष्पमुपन्यासो वर्णसंहार इत्यपि॰ ३१॥ रत्यर्थेहा विलासः स्याद्दृष्टनष्टानुसर्पणं॰ परिसर्पः

र्यं भीष्मः शरैः शायितः॥ प्रोढानेकधनुर्धरारिविजयश्रांतस्य चैकाकिनो बालस्यायमरातिलूनधनुषः प्रीतोभिमन्योर्वधात्॰ इत्यनेन भीष्मादिवधाद्दृष्टस्याभिम
न्युवधान्नष्टस्य बलवतां पांडवानां वासुदेवसहायानां संग्रामलक्षणे बिंदुरूपबीजप्रयत्नान्वयेन कंचुकिमुखेन बीजस्यानुसर्पणं परिसर्पः॥ यथा वा रत्नाव
ल्यां सागरिकावचनाच्चित्रदर्शनाच्चां सागरिकानुरागबीजस्य दृष्टनष्टस्य कासौक्कासाविसादिना वत्सराजेनानुसर्पणं परिसर्पः॥ यथा च मुद्राराक्षसे चाणक्ये
न पत्रलेखनसमये साधु वत्सलेसादिना पूर्वसंधौ दृष्टस्य समध्येन नष्टस्य राक्षससंग्रहरूपकार्यबीजस्यानुसरणानुसंधानात्परिसर्प इति॥ ॥[illegible]॥ ॥[illegible]॥

शिवः

८

द्वितीयेंके

विधूतमाह· विधूतंस्यादिति· यथा रत्नावल्यां सागरिका· स हि हिअअं मे संतावो बाधेदी ता रम्भ कुल्ल रुहजणम्मुराओ इसं [redacted] तेन सागरिकाबीजान्वयेन शीतोपचार विधूननाद्विधूतं· यथा च वेण्यां द्वितीयेंके भानुमत्याः दुःस्वप्नदर्शने न दुर्योधनस्यानिष्टशंकया पांडवविजयशंकया चारते विधूनना द्विधूतं· यथा वा मुद्राराक्षसे प्रथमेंके कोत्र न भिन्न वर्मेति नामानुपक्षिप्य अथवा न लिखामीतीदमनिष्ट [redacted] वस्तुनि नामलेखने अरते विधूननमिति· अथ शममाह· तच्छम इति· [redacted] तस्या अरतेः शमनमुपशमः। यथा रत्नावल्यां द्वितीयेंके राजा· निर्वर्ण्य· वयस्य· तया लिखितो हमिति यत्सत्यमात्मन्यपि बहुमानस्तत्कथं न पश्यामी सुपक्रमे· सागरिका· आत्मगतं· हिअअ समस्सस मणोरहा अविदेर निअंभूमिं गदा हलु

विधूतंस्यादरतिस्तच्छमः शमः। परिहासवचो नर्म धृतिस्तज्जाद्युतिर्मता· ॥२२॥

पाभ

पशमाच्छमः। यथा वा [redacted] मुद्राराक्षसे प्रथमेंके हंत दुरात्मा राक्षसो गृह्यते हंत गृहीत इत्यनेन चाणक्यस्यारतेश्चिंतायाउपशमाच्छम इति· २२ अथ नर्म· परिहास इति· यथा रत्नावल्यां द्वितीयेंके सुसं· सहि जस्स कदे तुमं आअदा सो अअं पुरदो चिट्ठदि· साग· सासूयं· सुसंगदे कस्स कदे अहं आअदा· सुसं· अइ अप्पसंकिदे णं चित्तफलअस्स ता गेण्ह एदम् इत्यनेन बीजान्वितं परिहासवचनं· यथा वा वेण्यां द्वितीयेंके दुर्योधनः। चेटीहस्तादर्घ्यमादाय देव्याः समर्पयति· पुन भानुमती· अर्घ्यं दत्वा· हला उवणेहि कुसुमाइं आणराएं विदेवदाणं सवरिअं णिवत्तेलिं· इति हस्तौ प्रसारयति· दुर्यो· पुष्पाण्यर्पयति· भानुमत्याः करस्पर्शजातकंपा याहस्तात्पुष्पाणि पतंति· इत्यनेन नर्मणा दुःस्वप्नदर्शनोपशमार्थं देवतापूजाविघ्नकारिणा बीजोद्घाटनात्परिहासस्य प्रतिमुखांगत्वं मुक्तं· यथा वा मुद्राराक्षसे प्रथमेंके चाणक्यः भोः श्रेष्ठिन्नामेवं वदेत्यादिना चंदनदासानिसंधानार्थं परिहासवाक्यं नर्म· अथ नर्मद्युतिमाह· धृतिरिति· यथा रत्नावल्यां द्वितीयेंके· सुसं· सहि अदक्खिणा दाणिं सि तुमं जा

दशरू

अथप्रणयनं १

सोत्तरेति· यथारत्नावल्यां द्वितीयेंके· विदूषकः। भोवअस्स दिट्ठिआ वड्ढसे· राजा· सकौतुकं· वयस्य किमेतत्· इत्यारभ्य· परिच्युत इति पर्यन्तेन राजविदूषकसागरिकासुसंगतानां
९ मन्योन्यवचनेनोत्तरोत्तरानुरागबीजोद्घाटनात्प्रणयनं· अथनिरोधमाह· हितरोध इति· यथा रत्नावल्यां द्वितीयेंके· राजा· धिङ्मूर्ख· आगाकथमपीतिपर्यन्तेन वत्सराजस्य सा
गरिकासमागमरूपस्य वासवदत्ता[redacted]प्रवेशसूचकेन विदूषकवचसा निरोधान्निरोधनं· यथावा मुद्राराक्षसे प्रथमेंके हप्पल एवेसनेन कुमुना हिनागमनायवे
षसिद्धये चंदनदासस्य राक्षस हितभूतस्य निरोधनान्निरोधः। अथपर्युपासनमाह· पर्युपास्तिस्त्विति· यथारत्नावल्यां द्वितीयेंके· प्रसीदेतिकृपामितिपर्यन्तेन चित्र

सोत्तरावाक्प्रणयनंहितरोधोनिरोधनम्ः[redacted]पर्युपास्तिस्त्वनुनयःपुष्पंवाक्यंविशेषवत्ः ३३॥

दर्शनात्कुपितायावासवदत्तायाअनुनयान्नायकनायिकयोरनुरागोद्घाटनान्वयेन पर्युपासनम्· यथावामुद्राराक्षसे प्रथमेंके· चाणक्यः। भद्रकस्मिंश्चिद्विषयेत्वांनियो
क्ष्यामीत्यनेनेष्टजनस्यानुनयात्पर्युपासनं· अथपुष्पमाह· पुष्पमिति· यथारत्नावल्यां द्वितीयेंके· राजा· सागरिकांहस्तेगृहीत्वास्पर्शंसुखंनाटयति· विदूषकः। भो
एसाअपुव्वसिरी इत्यारभ्य राजा· श्रीरेषापाणिरप्यस्याः इत्यनेन नायकयोः साक्षात्कन्यो न्यस्पर्शनात्सविशेषानुरागोद्घाटनात्पुष्पं· यथावामुद्राराक्षसे प्रथमेंके· चा
णक्यः। चंद्रगुप्तममात्यराक्षसराक्षसस्यकेत्यस्मीत्यिमामेवं मंस्थाइत्यारभ्यकाक्षंशारिवचं चंद्रगुप्तनृपतेःकर्तुंभवस्मेत्यपगिलं[redacted]तेनस्वाम्यनुरागप्रकाशकंवि शिवः
शिष्टंवचनंपुष्पम्· ॥३३॥

अथोपन्यासमाह उपन्यासइति · यथा रत्ना· द्वि· के· सुसं· महाभ्रलंसंकाए रसुपक्कम्यकुपितासही सागरियाताप्पसीददु इत्यं तेन ससुसंगतावच सा·
सागरिकामप्यालिखितासागरिकयाचत्वमिति मयतावाग्वचनमाबीजोद्भेदादुपन्यासः यथा वा मुद्राराक्षसे· प्रथमेंके· चंदनदासः॥ किं भि अं
इमादोजणादो इथी-अदीत्यादिराजानुरागहेतुर्बीजस्य रचना ११ अथ वज्रं वज्रमिति यथा रत्ना· द्वितीयेंके वासवदत्ताफलकं निर्दिश्य अज्ज
उत्त एसा वि त्त्यावि तुइमा वि वेरसुपकम्पचित्तकम्म पेरकवंती एसीसवे अणासमुप्पसोतिअनेन प्रत्यक्षनिष्ठुरमभिहितं· यथा वा मुद्रा· प्र· के· चाणक्ये
नभवानेवेसादिना चंदनदासं प्रति निष्ठुरमभिधानाद्वज्रम १२ अथ वर्ण· संहारमाह· चातुर्वर्ण्येति यथा वीरचरिते तृतीयेंकें· परिषदियमृषी

५२

उपन्यासो वाग्वचनमाव ज्रं प्रत्यक्षनिष्ठुरं चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते ३८

णामिति पद्येन ऋषिक्षत्रियामात्यादीनां संगतानां वचसा रामविजयाशंसिना परशुरामदुर्नयस्य द्रोहप्राज्ञा द्वारेणोद्भेदनाद्वर्णसंहारः यथा
मुद्रा· प्रथमेंके चाणक्येन पेयाताः किमिति प्रधार्येति पद्येन सर्वा अपि प्रकृतयः सुखेन न पांतु नत्त द्वलंवेनाहंकार्यं साधये किंतु स्वबुद्ध्यैवेति· च
तुर्वर्णनिर्वर्णनं वर्णसंहारः १३ एतान्निर्वपोदश प्रतिमुखांगानि मुखसंधुपक्षिप्तबिंदुलक्षणावांतरबीजप्रयत्नानुगुणपात्ताभिविधेया
नि एतेषां च मध्ये परिसर्पप्रगायन वज्रोपन्यासपुष्पाणां प्राधान्यमितरेषां यथासंभवं प्रयोग इति ३८

द.रू.टी.

१० 10

अथ गर्भसंधिमाह गर्भस्तु दृष्टनष्टस्येति प्रतिमुखसंधौ लक्ष्यालक्ष्यरूपतया स्तोकोद्भिन्नस्य बीजस्य यः सविशेषोद्भेदपूर्वकः सांतरायो लाभः पुन
र्विच्छेदः पुनः प्राप्तिः पुनर्विच्छेदः पुनश्च तस्यैवान्वेषणं वारंवारं सोऽनिर्द्धारितैकांतफलप्राप्त्याशागर्भसंधिरिति तत्र चौत्सुकित्वेन प्रामायाः पता
कायाः अनियमं दर्शयति पताका स्यान्न वेति प्राप्तिसंभवस्तु स्यादेवेति दर्शयति स्यादिति यथा रत्नावल्यां तृतीयेंके वत्सराजस्य वासवदत्तालक्ष
·अंतरायेन·४८ णोपायेन तद्वेषपरिग्रहं सागरिकाभिसरणोपायेन विदूषकवचनं च सागरिकाप्राप्त्याशा प्रथमं पुनर्वासवदत्तया विच्छेदः पुनः प्राप्तिः पुन

गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः द्वादशांगः पताका स्यान्न वास्य प्राप्तिसंभवः ३५ अभूताहरणं मार्गो रूपोदा
हरणं क्रमः संग्रहश्चानुमानं च तोटकाधिबले तथा ३६ उद्वेगसंभ्रमाक्षेपा लक्षणं च प्रणीयते ३७

र्विच्छेदं पुनरपायनिवारणोपायान्वेषणं नास्ति देवीप्रसादनं मुक्त्वा अन्य उपाय इत्यनेन दर्शितमिति यथा मुद्रा° द्वितीयेंके कौटिल्यधीर
गुणनिबद्धेति पयोधेरुपायापशंकाभ्यां मौर्यलक्ष्मीस्थैर्यरूपायाः प्राप्तेस्संभवः स च द्वादशांगो भवति तान्युद्दिशति अभूताहरणमिति सा
र्द्धेन ३६ ३७ यथोद्देशं लक्षणमाह अभूताहरणं छद्मेति यथा रत्ना° तृतीयेंके कांचनमाला साहु रे वसंतअ साहु अदिसइदो १०
अमच्चो जोअंधराअणो इमाए संधिविग्गहचिंताए इत्यादिना प्रवेशके नगृहीतवासवदत्तावेषायाः सागरिकायाः वत्सराजाभि

सररागांख्यमविदूषकसुसंगतान्नकुंजकांचनमालानुवादद्वारेण दर्शितमिति भक्ताहरणं यथा वेशपाणं तृतीयेंके अश्वत्थामा हत इति पथान्नृतासमुख्य मुक्ते
तिपरोग्न तववचनेनपुष्पविभिरस्यैव यवचनमुक्तम् यथा वा मुद्राराक्षसे द्वितीयेंके आहितुं डिकश्च यधाविरोगा विराध गुप्तस्य सर्वं प्राकृतवचनं प्रसक्तौ तो पयो
गिश्च प्रावररां प्रसक्तात स्वराक्षसं प्रतिकुसुमपुरस्थं तात कथनस्वापयोगिश्च प्रावरणाद् भक्ताहरणम् १ मार्गइति यथा रत्ना: तृतीयेंके विदूषकः
दिष्ट्या वड्ढसि समीहिदा [redacted] ए कज्जसिद्धीए राजा वयस्य कुशलं प्रियायाः इत्यारभ्य विदू: करतलकथयसेवमेव मित्यन्ते न यथा विदूषकेण

अभूताहरणाख्यं अमार्गस्तत्त्वार्थकीर्तनम् २

सागरिकासमागमः सूचितः तथैव निश्चितरूपो राज्ञो निवेदित इति तत्त्वार्थकथनं यथा वा मुद्राराक्षसे द्वितीयेंके नेदं विस्मृतमस्त्रिना न विषयव्यासं
गमस्थानमनेति राक्षसस्य तत्त्वार्थकथनमिति मार्गः २ रूपमाह: रूपमिति यथा रत्ना: तृतीयेंके राजा: अहो किमपि कामिजनस्य स्वगृहिणी समा
गम परिभाविनोऽभिनवं जनं प्रतिपक्षपातः तथा हि: प्रणयविशदां दृष्टिं वक्त्रे ददाति इत्यारभ्य कथं चिरयति वसंतकः किं न खलु विदितः स्या
दयं वृत्तान्तो देव्याः इत्यनेन रत्नावलीसमागमप्राप्त्याशानुगुणत्वेनैव देवीशंकापाश्च वितर्को रूपं यथा मुद्रा: द्वि: केरा

द· रू· टी·
११

क्षसः भगवति कमलालये मत् शाम गुरुला ज्ञाति पतः आनंदहेतुमपि देवमपपास्येत्यारभ्य अपि चाविनीते तदहमाश्रयोन्मूलनेनैव त्वामकामं
करोमीत्येतेराक्षसस्य वितर्कप्रतिपादनेरूपमिति ३ उदाहरणमाह· स्तोकर्षमिति· यथा रत्ना· तृती येंकें· विदू· सहर्षं ही ही भोः को संवीरज्जाला
हेरणा· वि· न· तारिसो· वअस्सस्स· परिसो सो· आसि· जारिसो महसपासादो· पिअवअस्सं सुमिय· भविस्सदि जितं केमि इत्यनेन रत्नावलीमा
प्तिवार्ती कौशांबीलाभादतिरिच्यत इति उत्कर्षाभिधानादुदाहरणं· यथा वेणीसं· तृ· के· पोपः शस्त्रं विभाति स्वभुजगुरुमद इति अश्वत्थाम्ना स्वोत्क
र्षस्याभिधानात् यथा मुद्रारा· द्वि· के· मयातावत्सुहृत्तमस्य चंदनदासस्येत्यारभ्य इष्टात्मजः सपदीति पद्यांतं राक्षसेन स्वोत्कर्षाभिधानादुदाह

रूपं विशेषवद्वाक्यं सोत्कर्षस्यादुदाहृतिः ३८ क्रमः संचिन्त्यमानाप्तिः ५

रणं ४ क्रमः संचिन्त्यमानेति यथा रत्ना· तृती· राजा· उपनतप्रियासमागमस्यापि मे किमिदमित्यारभ्य विदू· आकर्णिमो दिस्सागरिए· एसो· पि
अवअस्सो तुमं जेव्व· उद्दिसिअ· उक्कंठानिभरं मंतेदि· ता णिवेदेमि से उहागमणामि संतेन वत्सराजस्य चिन्त्यमानसागरिकासमागमस्य ११
[redacted] सागरिकाप्राप्तिः यथा मुद्रा· द्वि· के· पाऊणाणि रवसेसं इति गाथावाचनानंतरं स्वगतं· अये कुसुमपुरवृत्तांतज्ञो भवत्प्रणिधिरिति गाथा
र्थः इत्यनेन पूर्वं द्वारिकस्तिष्ठतीति कुसुमपुरवृत्तांतहरचारागमनस्य संचिंतितत्प्राप्तेः ५

ना२

क्रमांतरं मतभेदेनाह· भावज्ञानमिति· यथा रत्ना· ततो राजा· प्रिये सागरिके· शीतांशुर्मुखमुत्पले इति आरभ्य किंपद्मस्य रुचिं मितंतेनवासवद
त्तया वत्सराजभावज्ञानात्क्रमांतरं· यथा वा मुद्रा· द्विती· पाऊराशिरवसे समितिगथार्थभावज्ञा क्रमः ५ अथ संग्रहः संग्रह इति· यथा रत्ना· त
तो· राजा· साधु वयस्य साधु· इदं ते पारितोषिकं इति कटकं ददाति· इति सामदानाभ्यां विदूषकस्य सागरिकासमागमकारिणः संग्रहात्संग्र
हः यथा वा मुद्रा· द्वितीयांके· नाद्येन मया शाणिपरिधाप्य स्वस्ति भवते साधयाम्यहं इति कंचुकिवचनं सामदानरूपम् ६ अभ्यूह इति· यथा रत्ना·

भावज्ञानमथापरे· संग्रहः सामदानोक्तिरभ्यूहो लिंगतोनुमा ३८

ततो· राजा· धिङ्मूर्ख त्वत्कृत एवायमापतितोस्माकमनर्थः कुतः समारूढप्रीतिः प्रणयबहुमानात्प्रतिदिनं व्यलीकं वीक्ष्येदं कृतमकृतप्र
वेशं खलु मया· प्रियामुंचस्यद्य स्फुटमसहना जीवितमसौ प्रकृष्टस्य प्रेम्णाः स्खलितमविषह्यं हि भवति· विदू· भो अस्य वासवदत्ता किं करिष्य
दि न ति· रा· जा रा मि सा अरिच्छाउ रा दुष्करं जीविस्सदि त्ति· तद्के मीत्यत्र प्रकृष्टप्रेमस्खलनं सागरिकानुरागजन्येन वासवदत्ता पामरणा भ्यू
हनमनुमानं· यथा वा मुद्रा· द्वि· के· राक्षसः· व्यक्तमाहितुंडिकच्छद्मना विराधगुप्तेनानेन भवितव्यम् इति राक्षसेनाभ्यूहनादनुमानं ३८

ना२

तारयन्जेवसुत्ततंचिछाआवअज्ज

द॰रू॰टी॰ अथाधिबलम्· अतिसंधिरिति· यथा रत्नावल्यां· रती· कांचनमाला· भट्टिणि इअं सा चित्तसालि-आ वसंत अस्स ससंक रेमि छोदि कांदद्दा
१२ तीत्यादिना वासवदत्ता कांचनमालिकाभ्यां सागरिकासुसंगताविषाभ्यां राजविदूषकयोरतिसंधीयमानत्वादधिबलमिति यथा मुद्रा· द्वि·
कार्यस्य गत्वान्मनसः प्रभृतत्वाद्भ्रमणिधीनां विस्मृतं इदानीं स्मृतिरुपलब्धा· इत्यनेन इच्छजनासंधानादधिबलम्· २ अथ तोटकं संरब्धमिति
यथा रत्ना· त· वासवदत्तोऽपसृत्य· अज्जउत्त एदं सरि संएदं पुनः सरोपं अज्जउत्त उल्लेहि· किं अ ज्जउत्त वि· आहि जादिए से आ दुःखम राउभवी अदि·
ति

अतिसंधिरधिबलं संरब्धं तोटकं वचः ८

कंचणमाले एदेण ज्जेव अलदापासेण· बंधिअ· आणेहि· एदं दुट्ठबह्मणं· एदं पि दुट्ठ कण्णअं अग्गदो करेहि इत्यनेन वासवदत्तासंरब्धव
चसा सागरिकासमागमांतरायभूतेनानियतमामकारिणा तोटकमुक्तं· यथा वेणी· र· ती· प्रयलपरिबोधितः स्तिमिरघशेषे निशामित्या
दिना· धृतायुधो यावदहं तावदन्यैः किमायुधैरित्यंतेना अश्वत्थाम्नो कर्णाभ्युत्थाम्नो संरब्धवचसा सेनाभेदकारिणा पांडवविजयप्राप्त्याशान्वितं तो
टकं· यथा वा मुद्रा· द्वि ती· राक्षसः· शस्त्रमाकृष्य ससंभ्रमं· अपि मयि स्थिते कः कुसुमपुरमुपरोत्स्यति· प्रवीरक क्षिप्रमिदानीं· प्राकारं परितः श एम
रासनधरैः क्षिप्रं परिक्रम्यतामित्यादिना· विराधः· अमात्यालमावेगे नवनमिदं वर्ण्यते इत्यंते राक्षसस्य संरब्धवचनं तोटकमिति ८ १२

मतान्तरेण क्षिवलं तोटके लक्षयति तोटकस्यान्यथाभाव इति यथा रत्ना॰ तृती॰ राजा॰ देवि एवमपि प्रत्यक्षदृष्टव्यलीकः किं विज्ञापयामि॰
आताम्रतामपनयामि विलक्ष एष लाक्षाकृतां चरणयोस्तव देवि मूर्ध्ना कोपोपरागजनितां तु मुखेन्दुबिम्बे हर्तुं क्षमो यदि परं करुणामयि स्या
त् इत्यनेन तोटकान्यथाभावस्य संरब्धवचसं राज्ञोक्तत्वात् तोटकमाह॰ संरब्धवचनमिति यथा रत्ना॰ ३ राजा॰ प्रिये वासवदत्ते प्रसीद श्वास
वादत्ता अश्रूणि विधारयन्ती अज्जउत्त मा॰ एव्वं भण॰ अण्णसंकिदाइं॰ एदाइं॰ अक्खराइं इति वासवदत्तायाः संरब्धवचनोक्तिः॰ य
था वेणी॰ ५ राजा॰ सुन्दरक कच्चित्कुशलमङ्गराजस्य॰ पुरुषः कुशलं शरीरमात्रेण इत्यादिना॰ राजा॰ ससंभ्रमम् कथमित्येवमादिना संरब्ध

तोटकस्यान्यथाभावं ब्रुवते क्षिवलं परे संरब्धवचनं यत्तु तोटकं तं प्रचक्षते ८०
उद्वेगोऽरिकृता भीतिः शंकात्रासौ च विभ्रमः ११

वचस्तोटकमिति ८० उद्वेग इति यथा रत्ना॰ तृती॰ सागरिका॰ स्वगतं कहिं अकिदपुण्णेहिं अत्तणो इच्छाए मरिदुं ण पारीअदि॰ इत्यने
न वासवदत्तातः सागरिकायाः भयमित्युद्वेगः यो हि यस्यापकारी स तस्यारिः यथा वेण्यां ५ सूतः आयुष्मन् कथमासन्न एवासौ कौ
रवराजपुत्रमहावनोत्पातमारुतो मारुतिरित्यारभ्य अनार्य मा च रिष्यतीत्यन्तं अर्थिते उद्वेगः यथा वा मुद्रा॰ २ राक्षसः सोद्वेगमात्मगतं कु
तश्चाणक्यवटोः परितोषः अफलमनिष्फलं वा दाहकर्मणः प्रयत्नमधिगच्छामीति राक्षसस्य चाणक्यसकाशादुद्वेगः १०
मद्र २

द॰टी॰ शंकात्रासाविति यथा रत्नाव॰ल्यां ३ विदू॰ पश्य पश्य त्रुट्यैः स संभ्रमं का उगाएसाकहं दे ई वा स वद न्त्वाअप्पा तं वा बादे दि॰ राजा स संभ्रममुपसृत्य काता
१२ वित्त नेनवा सव दन्ता बुद्धि गृहीता याः सागरिका याः मरणाशंकया संभ्रम इति यथा वेणीं ३ केनेयथ्यो कलकलः ॥ अश्वत्थामा स संभ्रमं मातुल
13 कर्ण कथं एषभ्रातुः प्रतीज्ञा भंगभीरुः किरीटी समं शरवर्षैः कुर्वो धनराधेयाव भिद्रवति सर्वथा पीतं शोणितं दुःशासनस्य भीमेने संका तथा नेनयां२
प्रविश्य सप्रहारः संभ्रान्तः सूतः त्रायतां २ कुमार इति त्रासशङ्केत्याम्यां त्रासशंकाम्यां दुःशासन द्रोणावधसूचकाभ्यां पांडव विजयप्रा प्याशान्वि

गर्भवीजसमुद्भेदादाक्षेपः परिकीर्तितः ५२

तः संभ्रमः यथा वा मुद्रा॰ द्विती॰ राक्षसः वामाक्षिस्पंदनं सूचयि त्वा आत्म॰ कथं प्रथममेव सर्पदर्शनं अयं राक्षसस्य भयशंकाहेतुः संभ्रम
रिति ११ आक्षेपमाह गर्भेति यथा रत्नाव॰ तृती॰ राजा व यस्य देवीप्रसादनं मुक्त्वा नान्यमत्रोपायं पश्यामि॰ पुनः क्षणांतरे सर्वथा देवीप्रसा श्रिव
दनं प्रति निःप्रत्याशीभूताः स्म पुनस्तत्किमिह स्थितेन देवीमेव गत्वा प्रसादयामीत्यनेन देवीप्रसादायत्ता सागरिकागम[redacted]सि १२
द्धिरिति गर्भवीजोद्भेदादाक्षेपः यथा वेणीं ५ अंके सुंदरकः अथवा किमेत्थ देव्वं उवालहामि तस्सक्खु

एवं शिखिन्यस्यपि दविदुरवच्छ्रणादीजस्य परिभूदपि दामहहितोवदे कुरूस्य सां सहउशिपोत्याहरणापहूछमस्लस्त जदविसमाहितोः पंचालीके सग्राहणाकुसुमस्य फलमित्यनेन बीजमेव फलोन्मुखतयाऽऽक्षिप्यत इत्याक्षेपः यथा मुद्रा॰ द्विती॰ विराधः ततश्चाणाक्यहतकेनेत्यादि चाणाक्य बीजसमुद्भेदादाक्षेपः २२ एतानि द्वादशगर्भांगानि प्राप्त्याशाप्रदर्शकत्वेनोपनिबंधनीयान्येषां च समुद्धेऽभूताहरणमार्गतोटकाधिबलाक्षेपाणां प्राधान्यमिति सांगो गर्भसंधिरुक्तः ४१ अथावमर्शसंधिः क्रोधेनेति अवमर्शनमवमर्शः पर्यालोचनं तच्च क्रोधेन वा व्यसनाद्वा विलोभनेन वा भवितव्यमनेनार्थेनेत्यवधारितैकांतफलप्राप्त्यध्यवसायात्मा गर्भसंध्युद्भिन्नबीजार्थसंबंधो विमर्शोऽवमर्शः यथा रत्नावल्यां चतुर्थे॰ अग्निविद्रवपर्यंतो वासवदत्ताप्रसत्त्या निरपायरत्नावलीप्राप्त्यवसायात्माऽवमर्शो दर्शितः यथा वेण्यां षष्ठे दुर्योधनरक्ताक्तभीमसेनागमपर्यंतः युधिष्ठिरः निःश्वस्य विचिंत्य तीर्णो भीष्ममहोदधावित्यत्र स्वल्पावशेषे जयद्रथादिभिर्विजयप्रत्यर्थिसमस्तभीष्मादिमहारथवधादवधारितैकांतविजयावमर्शनं दर्शितं यथा वा मुद्रा॰ गर्भसंधौ प्रसिद्धस्य सुहृन्निष्ठचाणक्यनीतिरूपबीजस्य कौमुदीमहोत्सवप्रतिषेधात्मना मकरीनाम्न्याल्पया कथयावि मर्शनादनुसंधानात ४२

क्रोधेनावमृशेद्यत्र व्यसनाद्वा विलोभनात्
गर्भनिर्भिन्नबीजार्थः सोऽवमर्श इति स्मृतः ४२

द॰रू॰टी विमर्शसंधेरंगान्याह· तत्रापवादेतिसार्धेन ८३ यथोद्देशं लक्षणमाह· दोषेति· यथा रत्ना· ४ सुसंगता सा खु तवस्सिणी भट्टि
१५ णीए उज्जइणिं· पेसिइत्ति· पवादं· करिअ उवत्थिदे· अइदुरंते· ण जाणीअदि· कहिं पि णीदेत्ति· विदू· सोद्वेगं अदिणिग्घिणं· खु
14 किदं देवीए· इत्यारभ्य· भो वअस्स मा अण्णहा· संभावेहि· सा खु· देवीए· उज्जइणीए पेसिदा· अदो अप्पियं· ति· ण· कहिदं· राजा·
अहो निरनुरोधा मयि देवी संततं वासवदत्ता दोषप्रख्यापनादपवादः यथा वेण्यां· षष्ठे· युधिष्ठिरः पांचालक कच्चिदासादिता तस्य दु
रात्मनः कौरवापसदस्य पदवी· पांचा नकेवलं पदवी केशस्पर्शपातकप्रधानहेतुरुपलब्धश्च स तेन दुर्योधन दोषप्रख्यापनादपवा

तत्रापवादसंफेटौ विद्रवद्रवशक्तयः द्युतिः प्रसंगश्छलनं व्यवसायो विरोधनं ८३ प्ररो
चना व्याहृतिर्मादानं चत्र्योदश दोषप्रख्यापवादः स्यात् संफेटो रोषभाषणम् २ ८४

दः यथा वा मु· तृतीये· चाणक्यः स्मितं कृत्वा उपालब्धुं तर्हि वयमाहूता इति चाणक्येन सोपालंभरूप दोषस्य प्रख्यापनादपवादः १
संफेटः इति यथा वेण्यां षष्ठे· ततः प्रविशतः कौ दरेण भिहितं· अयि भो कौरवराजकृतं बंधुज नोदेशीनमन्युना मेव विषादं कृथाः
इत्यारभ्य क्रोधाधिक्षेपपरुषवाक्कलह प्रस्तावितघोरसंग्रामाविति ते न भीम दुर्योधनयोरन्योन्य रोषभाषणादि जयवीजान्वयेन १८
संफेटः इति· यथा मुद्रा· तृतीये· वैतालिका महाराज्ञा सुवर्णशतसहस्रं दापय ने चाणः नक्रोधं· वै हीनरे ति छें तदा दि राज चाणक्ययो रोष
संभाषणात् संफेटः २ ८५ ले

विद्रव इति। यथा छलितरामे। लवः। येनावृत्य मुखानि साम पठतामत्यन्तमायासितं बाल्याद्धेनुसतां क्षस्कन्दुवलयप्रसर्पत्प्रौढैः क्रीडितं युष्माकं हृदयं स एव विशिखै[illegible]र्वेदेयाः पू
रितां सस्थलोमच्छाविघोषतमः प्रवेशाविवशोबष्कूलवोनीयते। यथा वा। रत्नावल्यां चतुर्थेऽङ्के। नेपथ्ये महान्कालकलः। हर्म्याणां हेमपुष्पद्युतिमिवेत्यादि पुनर्वासवदत्ता।
एाकनुअज्जणेकारणेणएान्नणएमिएसामरणिएगिघ्यणानिअआए संजदासाअरिक्काविवज्जदीत्यनेन सागरिकावधवं भाविनि विद्रवः। यथा च मुद्राराक्षसे तृती
येऽङ्के। गृध्रैराबद्धचक्रमिति पद्ये वधरूपो विद्रवः। द्रव इति। यथोत्तरचरिते पञ्चमेऽङ्के। लवः। अथवा शान्तं पापं। वृद्धास्तेन विचारणीयचरितास्तिष्ठन्तु हं ति तिष्ठन्त्विति पद्ये लवो रा
मस्य गुरोस्तिरस्कारं कृतवान्। यथा वा वेण्यां षष्ठेऽङ्के युधिष्ठिरः। भगवन्कृष्णाग्रज सुभद्राभ्रातः। ज्ञातिप्रीतिर्मनसि न कृतेत्यादिना युधिष्ठिरेण बलभद्रस्य तिरस्करणं
यथा वा मुद्राराक्षसे तृतीयेऽङ्के चन्द्रगुप्तेन चाणक्यस्य अन्यैरेवेदमनुष्ठितमित्यादिना तिरस्करणं द्रवः। विरोधशमनमिति। यथा रत्नावल्यां चतुर्थेऽङ्के। सव्याजैः शपथैः

विद्रवो वधबंधादिर्द्रवो गुरुतिरस्कृतिः। विरोधशमनं शक्तिस्तर्जनोद्वेजने धुतिः॥४५॥

रित्यनेन सागरिकालाभविरोधि वासवदत्ताकोपोपशमनाच्छक्तिः। यथा वा उत्तरचरिते षष्ठेऽङ्के। लवः। विरोधो विश्रान्त इति पद्ये। यथा वा वेण्यां पञ्चमेऽङ्के। कुर्वन्त्वाप्ता हतानामि नोसा
दि भीमोक्तिः। यथा वा मुद्राराक्षसे तृतीयेऽङ्के। चाणक्यः। वृषल न पारितं प्रतिविधातुं। राजा। किमकौमुदीमहोत्सवप्रयोजनापेक्षया। चाणक्यः। कथमकौशलं न विघ्नति। प्रयोजनापे
क्षयैवेत्यादि किमकौशलादिति कार्यविरोधेऽपि तस्य विरोधस्य शमनाच्छक्तिः। तर्जन इति। यथा वेण्यां षष्ठेऽङ्के। एतद्वचनमुपश्रुत्य रामानुजस्य सत्वरमज्जनोद्वेगल्यादिनः
सत्कोपितः सरसमसंभ्रमं तेन दुर्वचनजलादलोड्य नाम्भांकुयोधन तर्जनोद्वेजनकारिभिः पाण्डवविजयानुकूलदुर्योधनोत्थापनहेतुभिर्भीमस्य द्युतिरुक्ता। यथा वा मुद्रारा
क्षसे तृतीयेऽङ्के। राजा। अन्यैरेवेदमनुष्ठितं। चाणक्यः। आः केनेत्यादिका तर्जनरूपा द्युतिः॥४५॥

गुरुकीर्तनमिति॰ यथा रत्नावल्यां चतुर्थेऽङ्के भो सो सिंहलेश्वरसुता रत्नावली नामायुष्मती वासवदत्तया सुपथ्यसे देवाय पूर्वं प्रार्थिता सती प्रतिदत्तेत्येनेन रत्नावलीलाभा
नुकूलाभिजनप्रकाशि[illegible]ना प्रसंगगुरुकीर्तनेन प्रसंगः। यथा वा मृच्छकटिकायां॰ चंडालः एसो सा अंतदत्तसुओ अज्जविस्सदत्तस्स णत्तुओ चारुदत्तो वावादिदुं व
ज्झट्ठाणं णिज्जदि एदेण किल गणिआ वसंतसेणिआ सुवण्णलोहेण वावादिद त्ति॰ चारुदत्तः मखशतपरिपूतमित्यादिना चारुदत्तवधाभ्युदयानुकूलप्रसंगगुरुकी
र्तनं॰ यथा वा मुद्राराक्षसे तृतीयेऽङ्के॰ अंभोधीनां तमालप्रभवकिसलयश्यामवेलावनानामापारेभ्यश्चतुर्णां चटुलतिमिकुलक्षोभितान्तर्जलानां॰ मालेवाम्लानपुष्पानुबन्ध्य
तिशतनृपतिभिर्याशिरोभिः सामय्येव स्खलंती कथयति विनयालंकृतं ते प्रभुत्वमित्यादि गुरुकीर्तनं॰ छलनमिति॰ यथा रत्नावल्यां चतुर्थेऽङ्के॰ राजा॰ अहो निरोधाभ्युदयेऽपि देवीस
नेन वासवदत्ताया इष्टासंपादनाद्वत्सराजस्यावमाननाच्छलनमिति॰ यथा वा मुद्राराक्षसे तृतीयेऽङ्के॰ राजा॰ सकोपं॰ आर्य एवं सर्वत्र निरुद्धचेष्टाप्रसरैरेभिः सारंभैर्नेत्स्ववक

गुरुकीर्तनं प्रसंगश्छलनं चावमाननम्॰ व्यवसायः स्वशक्त्युक्तिः

मेणं पि मुज्यामहे इत्यादिना गुरोश्चाणक्यस्यावमाननाच्छलनं॰ व्यवसाय इति॰ यथा रत्नावल्यां चतुर्थेऽङ्के ऐन्द्रजालिकः॰ किं धरणीए मिअंको आआसे महिहरो जले ज
लणो॰ मज्झण्हे पओसो दाविज्जउ देहि आणत्तिं अहवा किं बहुणा जंपिएण मज्झ पइण्णा एसा भणामि हिअएण जं महसि दट्ठुं तं दावेमि फुडं गुरुणो मंतप्पहावेण। स
नेनैन्द्रजालिको मिथ्याग्निसंभ्रमोत्थापनेन वत्सराजस्य हृदयस्थसागरिकादर्शनानुकूलां स्वशक्तिमाविष्कृतवान्॰ यथा वा वेणीसंहारे॰ नूनं तेनाद्य वीरेण प्रति
युधिष्ठिरः स्वदंडशक्तिमाविश्चकारेति॰ यथा च मुद्राराक्षसे तृतीयेऽङ्के॰ चाणक्यः॥ विहस्य॰ एतत्कृतं राक्षसेन नयामुना [illegible] नेन्ज्ञातं॰ नंदमिव नवं तं मुहूर्तमया पुनर्भ शिवः
वानिव हतलं मलयकेतुराधिराज्यपदे नियोजयितव्य इति॰ इदं राक्षसनीतिविभवाक्षेपार्थमात्मासवचनेन स्वशक्तिप्रशंसनं व्यवसायः॥ ॥०॥ ॥ १५

संरब्धोक्तिरिति। यथा वेणीसंहारे पंचमेंके। राजा। रे रे मरुत्तनय किमेवं वृद्धस्य राज्ञः पुरतो निंदितव्यमात्मकर्म श्लाघसे। अपि च। कृष्टा केशेषु भार्ये सारम्भ्यशोकं क्लीवन्मयनसलिलिरिति
राजा। कुरात्मन् भरतकुलापसद पांडवपशो नाहं भवानिव विकत्थनाप्रगल्भः। किंतु द्रक्ष्यंति न चिरात्सुप्तं इत्यादिना संरब्धयोः स्वशक्त्युक्तिर्विरोधनं। यथा वा मुद्राराक्षसे
तृतीयेंके। चाणक्यः। दैवमविद्वांसः प्रमाणयंति। राजा। विद्वांसोप्यविकत्थना भवंति। इत्यादिना क्रोधसंरब्धयोरन्योन्याधिक्षेपोक्तिर्विरोधनं। [redacted] सिद्धे
ति। यथा वेणीसंहारे षष्ठेंके। पांचालकः। अहं देवेन चक्रपाणिना सप्रश्रयमाज्ञप्तः नं संदेहं न पूर्यंतां सलिलेन रत्नकलशा राज्याभिषेकाय त इत्यादिना मंगलानि कर्तुमाज्ञापयति दे
वो युधिष्ठिर इत्यनेन द्रौपदीकेशसंयमनयुधिष्ठिरराज्याभिषेकयोर्भाविनोरपि सिद्धत्वेन दर्शिका प्ररोचना। विकत्थनेति। यथा वेणीसंहारे पंचमेंके। भीमः। तात अंब सक
लरिपुजयाशेति। अपि च। तात। चूर्णिताशेषकौरव्य इत्यनेन विजयबीजानुगतस्वगुणविकरणाद्विचलनं। यथा वा रत्नावल्यां चतुर्थेंके यौगंधरायणः। देव्या मद्वच

संरब्धोक्तिर्विरोधनं॥ ६६॥ सिद्धामंत्रणतो भाविदर्शिका स्यात्प्ररोचना। विकत्थना विचलनमादानं कार्यसंग्रहः॥ ६७॥

नात्र पेत्यनेनान्यपरेणापि यौगंधरायणेन मया जगत्स्वामितानुबंधी कन्यालाभो वत्सराजस्य कृत इत्यनेन स्वगुणविकरणं विचलनं। आदानमिति। यथा वेणीसंहारे षष्ठेंके भी
मः। ननु भोः समंतपंचकसंचारिणः रक्षो नाहं भिक्षुक इत्यादिना समस्तवध[redacted] कार्यस्य संग्रहः। यथा वा रत्नावल्यां चतुर्थेंके। सागरिका। दिष्ट्या विलोक्य। दिष्ट्या समंत
त्प्रज्वलितो भगवान् हुतवहोद्य करिष्यति दुःखावसानमिति। अनेन दुःखावसानकार्यस्य संग्रहः। यथा च जगत्स्वामित्वलाभः प्रभोरिति। यथा च मुद्राराक्षसे चतु
र्थेंके। राक्षसः। वामाक्षिस्पंदनं सूचयित्वा आदिप्रस्तावगतार्थप्रतिपादयंतीसंतं कार्यसंग्रहणं चाणक्यकर्तृकस्य राक्षसामात्यसंधानरूपस्य कार्यस्य राक्षसेनैवानुभूयमानत्वादि
दुःशकुनवारसंग्रहणादादानं। एतानि त्रयोदश गर्भांगानि नैवे तेषामपवादस्थाकिंप्ररोचनादानानि प्रधानानीति ज्ञेयं॥ ६७॥

दशरू·टी·

१६

16

अथनिर्वहणसंधिः। वीजवंतइति। यथावेणीसंहारे षष्ठेके· कंचुकी· उपसृत्यसहर्षं· महाराजवर्द्धसे· अयंखलुकुमारभीमसेनः सुयोधनक्षतजारुणीकृतसकलशरीरोदुर्लक्ष्यव्यक्ति

रित्यादिनाद्रौपदीकेशसंयमनादिमुखसंध्यादिवीजानांनिजजयावधानीपक्षिप्तानामेकार्थयोजनं· यथावारत्नावल्यां चतुर्थेके सागरिकारत्नमालावसुभूतिबाभ्रव्यादीनामर्था

नांमुखसंध्यादिषुप्रकीर्णानांवत्सराजैककार्यार्थत्वं· वसुभूतिः सागरिकांनिर्वर्ण्यापवार्य· बाभ्रव्य सुसदृशीयंराजपुत्र्याइत्यादिनादर्शितं· यथाचमुद्राराक्षसे सप्तमेंके· प्र

विश्यपुरुषः जेदुजेदुकुमारो· अज्जगुम्मअ एस दौवारिक रक्खो विरुसवेदि दुसायंकसमानिप्रतिर्वंतं प्रथमेके किमत्रलिनवामीत्यादिनाएवमेवेदंसंतेनोपक्षिप्तस्यवीजस्या

नेकधाप्रकीर्णस्यैककार्यार्थीकरणमिति निर्वहणसंधिः। अथास्यांगान्याहसार्धेन· संधिरिति· ४९ यथोद्देशं लक्षणमाह· संधिर्वीजोपगमनमिति· यथारत्नावल्यां· वसुभूतिः· बाभ्रव्यसुस

दृशीयंराजपुत्र्या· बाभ्रव्यः ममाप्येवमेवप्रतिभाति इत्यनेननायिकावीजोपगमनात्संधिः। यथावावेणीसंहारे षष्ठेके· भीमः· भवतियज्ञवेदिसंभवे स्मरतिभवतीयन्मयोक्तं चंचद्भुजेतीस

निष्पत्तीनिर्भाविकार्यस्यमार्गणंविरोधः।५०॥

वीजवंतोमुखाद्यर्था विप्रकीर्णायथायथं· ऐकार्थ्यमुपनीयंतेयत्रनिर्वहणंहितत् ·४८। संधिर्विरोधोग्रथनं निर्णयः परिभाषणं·

प्रसादानंदसमयाः कृतिर्भाषोपगूहने· पूर्वभावोपसंहारौ प्रशस्तिश्चचतुर्दश। संधिर्वीजोपगमनं विरोधः कार्यमार्गणं·५०॥

नेनोपक्षिप्तस्यवीजस्यपुनरुपगमनात्संधिः। यथावामुद्राराक्षसेसप्तमेंकारंनेसिद्धार्थकस्यप्रवेशेनवीजस्यचाणक्यनीतेरूपगमनान्निर्वहणास्यसंधिः। विरोधमाह· विरो

धइति· यथारत्नावल्यांचतुर्थेके वसुभूतिः। निरूप्य· कुतइयंकन्यका· राजा· देवीजानाति· वासवदत्ता· अज्जउत्त एसासुपञ्चामं· राजा· आत्मगतं· यौगंधरायणेनन्यस्ताकथमसौ

मामनिवेद्यकरिष्यतीत्यनेनरत्नावलीरूपकार्यान्वेषणाद्विरोधः। यथावावेणीसंहारेषष्ठेके· भीमः मुंचतुमामार्यः क्षणमेकं· युधिष्ठिरः किमपरमवशिष्टं· भीमः संयमामि

सुपक्रम्य· युधिष्ठिरः गच्छतुभवाननुभवतुनपस्विनीवेणीसंहारमित्यनेनकेशसंयमनकार्यस्यान्वेषणं· यथावामुद्राराक्षसेसप्तमेके सिद्धार्थकक्षपणकयोर्विवादे· क्ष १६

पणकः। सावगगछदुहोदुदेकज्जसिद्धीअरहंतिभाउराअएणेदामुद्दंआचेमीसनेनक्षपणकेनचिकीर्षितमहाप्रमादेनसिध्यर्थंमुद्रायाचनेव्याजेनभागुरायणप्रति

ग्रथनमिति । यथा रत्नावल्यां चतुर्थेऽङ्के । यौगंधरायणः । देव क्षम्यतां यद्देवस्यानिवेद्यैवमयैतत्कृतमित्यनेन वत्सराजस्य रत्नावलीप्रापणकार्यपक्षे पाठ्ग्रथनं । यथा वा वेणीसंहारे षष्ठेऽङ्के । भीमः । पांचालि नखलु मयि जीवति संहर्तव्या दुःशासनविलुलिता वेणिरात्मपाणिना । तिष्ठतु स्वयमेवाहं संहरामीत्यनेन द्रौपदीकेशसंयमनकार्यस्य पक्षे पाठ्ग्रथनं । यथा वा मुद्राराक्षसे पंचमेऽङ्के । भागुरायणः । स्वगतं । कष्टमेवमपि नामास्मासु स्नेहवान्कुमारो मलयकेतुरतिसंधातव्य इत्यहो दुष्करं । अथवा कुले लज्जायां चेतिहस नेन कार्यस्य मलयकेत्वतिसंधानेन राक्षसवशीकरणरूपस्य पक्षे पाठ्ग्रथनं । निर्णयमाह अनुभूतार्थ्याख्या निर्णयः । यथा रत्नावल्यां चतुर्थेऽङ्के । यौगंधरायणः । कृतांजलिः । देव श्रूयतामियं सिंहलेश्वरदुहिता सिंहलेश्वरदुहिता सिद्धादेशेनोपदिष्टेत्युपक्रम्य तदालापवणिके देवी दग्धेत्युपक्रम्य तिमिसिद्धिमुसाधनं दनिकं वा भ्रवः प्रेषितमित्यन्तेन यौगंधरायणः स्वानुभूतमर्थं ख्यापितवान् । यथा वा वेणीसंहारे षष्ठेऽङ्के । भीमः । देव देव अजातशत्रो अद्यापि दुर्योधनहतकः । मया हि तस्य दुरात्मनो भीमो क्षितितले शरीरमिति इत्यनेन स्वानुभू

ग्रथनं तदुपक्षेपो ऽनुभूतार्थ्याख्यातु निर्णयः । परिभाषा मिथो जल्पः प्रसादः पर्युपासनम् ॥ ५१ ॥

तार्थस्य भीमेन कथनात् । यथा वा मुद्राराक्षसे पंचमेऽङ्के क्षपणकः । स्वगतं । अमेक्षितं मलयकेतुहतकेन कृतार्थोऽस्मीत्यनेन बीजस्यानुगुणं कार्यं मलयकेतुराक्षसयोर्विरोधरूपं तस्य प्रख्यापनात्कथनान्निर्णयः प्रकृति । परिभाषेति । यथा रत्नावल्यां चतुर्थेऽङ्के । रत्नावली । आत्मगतं । किदावराद्धा देवीए ण सक्कुणोमि मुहं दंसेदुं । वासवदत्ता । कालं इत्थु पक्रम्य । वासवदत्ता । वसुभूतिं निर्दिश्य । अज्ज अमच्चो अं पराहिणेण आउत्ती किद लि जे ण जाणं तेण विण्णविदं रक्खिदं म्मीत्यनेनान्योन्यपरिभाषणात्परिभाषणं । यथा वा वेणीसंहारे षष्ठेऽङ्के । भीमः । दुर्योधनासिरजात्सदसि नृपशुनेत्यादिना कासो भानुमती कथं नोपहसति पांडवदारानित्यनेन परिभाषणं । यथा वा मुद्राराक्षसे पंचमेऽङ्के भागुरायणाभ हंतयोर्मिथोजल्पनं परिभाषणं । प्रसाद इति । यथा रत्नावल्यां चतुर्थेऽङ्के देव क्षम्यतामित्यादि । यथा वा वेणीसंहारे षष्ठेऽङ्के । भीमः । द्रौपदीमुपसृत्य । देवि पांचालतनये दिष्ट्या वर्धसे रिपुकुलक्षयेनेत्यनेन द्रौपद्या भीमेनाराधितत्वात्प्रसादः । यथा वा मुद्राराक्षसे पंचमेऽङ्के । भागुरायणेनात्मना वेगेनेत्युपक्रम्य तदर्थं च वस्तुनि निवेदने मनीषा राक्षसः आनंदराज्यलाभाद्यु

आनंद इति। यथा रत्नावल्यां चतुर्थेऽङ्के। राजा। यथाह देवी। रत्नावली गृह्णाति। यथा च वेणीसंहारे षष्ठेऽङ्के। द्रौपदी। णाध विसुमरिदह्मि एदं वावारं णाधस्स पसादेण पुणोवि सिक्खिस्सं। केशान्बध्ना
ति। यथा वा मुद्राराक्षसे सप्तमेऽङ्के। राजा। विगुणीकृतकार्मुकोपि सैन्यैः प्रार्थितरत्नावलीभालकेशसंयमनाय [illegible] राक्षसमप्राप्ति [illegible] मानिरूपैरानंदः समय इति। यथा रत्नावल्यां चतुर्थे
ऽङ्के वासवदत्तारत्नावलीनालिंग्य समस्कारं वृद्धि गमिय इत्यनेन भगिन्योश्च मान्यसमागमनेन दुःखनिर्गमनात्समयः। यथा च वेणीसंहारे षष्ठेऽङ्के। युधिष्ठिरः। भगवन्कुतस्तस्य युधि
विजयादन्यथा यस्य भगवान्पुरुषः स्वयमेव नारायणो मंगलान्याशास्ते। कृतं गुरुतमसंरंभादिक्षोभेण तस्य दिव्यायुधिष्ठिरेण दुःखापगमदर्शनात्। यथा च मुद्राराक्षसे सप्तमेऽङ्के चाणक्य
ः सहर्षं। अये अयममात्यराक्षसः। येन महात्मना गुरुभिः कल्पनाक्लेशैर्दिसनेन चाणक्यदुःखापमर्शनादकान्तिरिति। यथा रत्नावल्यां चतुर्थेऽङ्के राजा। को देव्याः प्रसादं न नु बहु म

आनंदो वाञ्छितावाप्तिः समयो दुःखनिर्गमः॥
कृतिर्लब्धार्थशमनं भाषणं मानादाप्तिश्च भाषणम्। ५२॥

न्यते। वासवदत्ता। अज्जउत्त दूरे से माउकुलं ता तधा करेहि जेण बंधुअणं ण सुमरेदि। सा [illegible] त्योन्यवचसा लब्धाया रत्नावल्या राज्योत्कुलिशेन उपशमनात्। यथा वा वेणीसंहारे षष्ठेऽङ्के
भीमसेनः। एते खलु भगवन्तो व्यासवाल्मीकिजामदग्न्यजाबालिप्रभृतयो देवा अभिषेकं धारयन्तस्तिष्ठन्ती संनेन आत्तराज्यस्य अभिषेकमंगलैः स्थिरीकरणं कृतिः। यथा
वा मुद्राराक्षसे सप्तमेऽङ्के। चाणक्यः। वृषल वृषल अमात्यराक्षसेनानुगृहीतोसि दिष्ट्या वर्धते भवान्। राजा। एष प्रसादश्चाणक्यगुरुणानानुभूयत इत्यनेन राज्यस्थिरीकर
णात्कृतिः। अथ भाषणं। मानाद्याप्तिरिति। यथा रत्नावल्यां चतुर्थेऽङ्के। राजा। अतः परमपि प्रियमस्ति। नीतो विक्रमबाहुरात्मवशतां। किमनेन कामार्थमानादि
लाभाभाषणमिति। यथा वा वेणीसंहारे। युधिष्ठिरः। पश्यन्तु देवाः। क्रोधान्धैः सकलं हृतं रिपुकुलमित्यादिना भाषणं। यथा च मुद्राराक्षसे सप्तमेऽङ्के। राक्षसः। प्रकामं। विष्णुगुप्तेन
मः सर्वकार्यप्रतिपत्तिहेतवे सुहृत्कृतमित्यादिना भाषणं। ५२।

अपूर्वभावोपस्पृष्टमेकं कथयतीति कार्यदर्शीति । यथा रत्नावल्यां चतुर्थेऽङ्के । यौगन्धरायणः । एवं विज्ञाय भगिन्याः संप्रति करणीये देवी प्रमाणं । वासवदत्ता । अज्जउत्त किं ण भणासि पडिवा
दरि सेद अप्पणा (?) निवसनेन वत्सराज आयत्तं रत्नावलीं दृष्यतामिति कार्यस्य यौगन्धरायणेनानुप्रविष्टस्य वासवदत्तया दर्शनात् सर्वभाव इति । यथा वा वेणीसंहारे षष्ठेऽङ्के । भीमः । बुद्धिमति
केकङ्कमामान्तु भानुमती पुत्रि भवतु संप्रति पाण्डवानिति । यथा च मुद्राराक्षसे सप्तमेऽङ्के । चाणक्यः । भद्र निवेदय नाममात्यराक्षसाय सोऽयमिदानीं आनीत इति कार्यदर्शनं सर्वभावः । अ
द्भुतप्राप्तिस्तु यथा वेणीसंहारे षष्ठेऽङ्के । नेपथ्ये । भो भो समन्तपञ्चकसञ्चारिणः दग्धो वायवस्तु भवते राजन्यलोकाभ्यः कार्यार्थं इत्यस्योरिति । युधिष्ठिरः । देवि एवं ते मूर्धजानां संरोभिनन्दिनो न भस्त
लसंचारिणा मिवज्जनेनेसनेनानुनार्थ प्राप्तिर्न्याः स्यंसं आपर्यामनारूढिरपि भवति । यथा वा मुद्राराक्षसे सप्तमेऽङ्के । ततः प्रविशति निजवनिकान्तरगतो राक्षसः । मात्र दृश्य
माणः । मन इस कोपपदे केनोत्तुङ्गजटाकलापकपिलो बद्धः पटान्ते शिखी साधुपमानेनानुनयदुक्ता राक्षस प्राप्तिरिस्तु तप्राप्तेः पूर्वभावः पूर्वगूहनं । वराणि रिति । यथा सर्वज्ञः । किं ते

कार्यदृष्ट्यद्भुतप्राप्ती पूर्वभावोपगूहने । वरादिः काव्यसंहारः प्रशस्तिः शुभशंसनम् ॥ ५२ ॥

भूयः प्रियमुपकरोमीसनेन कार्यस्य संहरणात् काव्यसंहारः । प्रशस्तिरिति । यथा वेणीसंहारे । प्रीततरश्चेद्भगवांस्तदिदमस्तु । अकृपणमतिः कामं जीयाज्जनः पुरुषायुषं भगवति
र्भक्तिर्द्वैतं विनापुरुषोत्तमे । कलितभुवनोविद्वद्वन्धुर्गुणेषु विशेषवान्सततसुकृती भूयाद्भूपः प्रसादितमण्डल इति । यथा वा रत्नावल्यां । तथापीदमस्तु । भरतवाक्यं । उर्वीमुद्दामसस्यां जन
यतु विसृजन्वासवो वृष्टिमिष्टामिष्टैस्त्रैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः । आकल्पान्तं च भूयात्स्थिरसमुपचितसंगतिः सज्जनानां निःशेषां यान्तु शान्तिं पिशुनज
नवचोवज्जनादुर्जलेपमिति । यथा च मुद्राराक्षसे । तथापीदमस्तु । भरतवाक्यं । वाराहीमात्मयोनेस्तनुमवनविधावास्थितस्यानुरूपां यस्य प्राग्दन्तकोटिं प्रलयपरिगता शिश्रिये
भूतधात्री । म्लेच्छैरुद्विज्यमाना भुजयुगमधुना संश्रिता राजमूर्तेः स श्रीमद्बन्धुभृत्यश्चिरमवतु महीं पार्थिवश्चन्द्रगुप्त इति । मुग्धाङ्गं मनाम्नां मालिनीसेनानि चतुर्दश निर्वहणाङ्गा

षट्प्रकारं संध्यंगानां प्रयोजनमित्याह॰ उक्तांगानामिति॰ मानिप्रयोजनमाह॰ इष्टस्येति॰ विवक्षितार्थनिबंधनं गोप्यार्थगोपनं प्रकाश्यार्थप्रकाशनं अभिनयरागवृद्धिः चमत्कारित्वं काव्यस्येतिवृत्तस्य विस्तरश्चेत्यंगैरेभिः षट्प्रयोजनानि संपद्यंत इति॰ ५४ पुनर्वस्तुविभागमाह॰ द्वेधेति॰ ५५ कीदृक्तत्संकीर्त्य॰ दृश्यश्रव्यमित्याह॰ नीरसेत्यनुचितमिति॰ ५६ सूच्यप्रतिपादनप्रकारमाह॰ अर्थोपक्षेपकैरिति॰ ५७ तत्र विष्कंभकं लक्षयति॰ वृत्तेति॰ अतीतानां भाविनां च कथावयवानां संक्षेपको मध्यमेन मध्यमाभ्यां वा पात्राभ्यां प्रयोजितो विष्कंभकः॥ स द्विविधः शुद्धः संकीर्णश्चेत्याह॰ एकेति॰ एकेन द्वाभ्यां वा मध्यमपात्राभ्यां शुद्धो भवति॰ नीचमध्यमपात्रैर्युगपत्संकीर्ण इति॰ ५८ अथ प्रवेशकमाह॰ तद्वदेवेति॰ तद्वदेवेत्यनेन भूतभविष्यदर्थज्ञापकत्वमतिदिश्यते॰ अनुदात्तोक्त्या च नीचपात्रप्रयोजित इति विष्कंभकलक्षणापवादः॥ अंकद्वयस्यांतरित्यनेन प्रथमांके प्रतिषेधः॥ ६०॥ अथ चूलिका॰ अंतर्जवनि

उक्तांगानां चतुःषष्टिः षोढा चैषां प्रयोजनं॰ इष्टस्यार्थस्य रचना गोप्यगुप्तिः प्रकाशनं॰ ५४॥ रागः प्रयोगस्याश्चर्यं वृत्तांतस्यानुपक्षयः॥
द्वेधा विभागः कर्त्तव्यः सर्वस्यापीह वस्तुनः॥ ५५॥ सूच्यमेव भवेत्किंचिद्दृश्यश्रव्यमथापरं॰ नीरसोनुचितस्तत्र संसूच्यो वस्तुविस्तरः॥ ५६॥
दृश्यस्तु मधुरोदात्तरसभावनिरंतरः॥ अर्थोपक्षेपकैः सूच्यं पंचभिः प्रतिपादयेत्॥ ५७॥ विष्कंभचूलिकांकास्यांकावतारप्रवेशकैः॥ वृत्त
वर्तिष्यमाणानां कथांशानां निदर्शकः॥ संक्षेपार्थस्तु विष्कंभो मध्यपात्रप्रयोजितः [redacted] एकानेककृतः शुद्धः संकीर्णो नीचमध्यमैः॥ तद्वदे
वानुदात्तोक्त्या नीचपात्रप्रयोजितः [redacted] प्रवेशोंकद्वयस्यांतः शेषार्थस्योपसूचकः॥ अंतर्जवनिकासंस्थैश्चूलिकार्थस्य सूचना॰ ॥६१॥

कृतिः॰ नेपथ्यपात्रेणार्थस्य सूचनं चूलिकेति॰ यथोत्तरचरित्रे द्वितीयांकादौ॰ नेपथ्ये॰ स्वागतं तपोधनायाः॰ ततः प्रविशति तपोधना इति नेपथ्यपात्रेणात्रेय्या सूचना चूलिका॰ यथा वीरचरिते चतुर्थांकस्यादौ॰ नेपथ्ये॰ भो भो वैमानिकाः प्रवर्त्यंतां रंगमंगलानि॰ कृशाश्वांतेवासी सादिसूच्य नेपथ्यपात्रैर्देवैः रामेण परशुरामो जित इति सूचना चूलिका॰ यथा च मुद्राराक्षसे सप्तमांके॰ नेपथ्ये॰ इत इतो देव इत्यनेन पथ्यपात्रैर्देवचंद्रगुप्तप्रवेशस्य सूचना चूलिका॰॥ ॥ ॥७॥ ॥७॥

अथांकास्यं अंकांतपात्रे इति · अंकांतएव पात्रं अंकांतपात्रं तेन विशिष्टस्योत्तरांकानुरवस्य सूचनं तत्रैतेनोत्तरांकावतार अंकास्यं यथा वीरचरिते द्वितीयांकांते · प्रविश्य सुमंत्रः भगवं
तौ वसिष्ठविश्वामित्रौ समार्गवाप्युस्मानाह्वयंतः इत्युपक्रम्य तत्रैव [redacted] वगच्छाम इत्युपक्रमे समाप्तिं तस्यानन्तरं प्रविशतिं उपविष्टौ वसिष्ठ विश्वामित्रपरशुरामाः इत्युत्तरां
कांतएव प्रविष्टेन सुमंत्रपात्रेण शतानंदजनककथाविच्छेदउत्तरांकानुरवस्य सूचनादंकास्यमिति · यथा वा मुद्राराक्षसे द्वितीयांके कोन्नः प्रविश्य सासनस्थः पुरुषेणानुगम्यमानः
चित्रिनीतकांस्येन प्रथमांकांते चाणक्येन मदक्षेन विगाह्मान मिति राक्षसस्थानस्यनीतिप्रयोगस्य वक्ष्यमाणस्य सूचनादंकास्यमिति · ५१ अथांकावतारः अंकावतार इति · य

अंकांतपात्रैरंकास्यं छिन्नांकस्यार्थसूचनात् · ५१ अंकावतारस्त्वंकांतपात्रांकस्याविभागतः एभिः संसूचयेत्
चंद्रप्रपंचैः प्रदर्शयेत् · ५२ नाद्यधर्ममपेक्ष्यैतत्पुनर्वस्तु त्रिधेष्यते · सर्वेषां नियतस्यैव श्राव्यमश्राव्यमेव च · ५३
सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतं · द्वेधान्यन्नाट्यधर्माख्यं जनांतमपवारितं · ५४ ॥

तु प्रविष्टपात्रेण सूचितमेव पूर्वांकावच्छिन्नार्थनयैवांकांतरमापतति प्रवेशकविष्कंभकादिशून्यमंकावतारः यथा मालविकाग्निमित्रे प्रथमांकांते · विदूषकः तेन हि उभे वि देवी
रूपस्याः गितगृहं गत्वा संगीतोपकरणं कृत्वा तत्र भवतः दूतं विसर्जयिष्यथः अथ वा मुदंगशब्द एव एनं उत्थापयिष्यति इत्युपक्रमे मृदंगशब्दश्रवणानन्तरं सर्वा एव पात्राणि
प्रथमांकांतप्रवेशितानि पात्राणि संक्रांतिदर्शनं द्वितीयांकादावारभंते इति प्रथमांकार्थाविच्छेदेनैव द्वितीयांकस्यावतरणादंकावतार इति · यथा वा मुद्राराक्षसे चतुर्थेंऽके कारभक
प्रवेशानन्तरं · राक्षसः आत्मगतं · कष्टमिम प्रयोजनं यथायं मलितइति प्रयोजनानां धातुस्यान्तस्थलं च गच्छामि राक्षसं प्रति का रतन्को तावत्क्षमाणस्य चाणक्यनीत्यैवेति पर्थे
विरोधस्य पूर्वांकानुगतत्वादंकावतरणं · ५३ पुनस्त्रिभाव वस्तु विभाग माह नाट्यधर्ममिति · केन प्रकारेण त्रैधं तदाह · सर्वेषामिति · ५४ सर्वश्राव्यमिति तत्सर्वश्राव्यं यद्वस्तु तत्प्रका

द०कू०टी०

१९

नत्वअनांनिकमाह० त्रिपकतोकेति० यस्मिन्नर्थ्ये तस्मांनेत्रेआर्थेसर्वांगुलिंवक्रानामिकंत्रिपताकाकरंकृत्वा अन्येनसहमन्त्रंअनेनजनांतिकमिति० ८५। अपवारितमाह० रहस्यमिति० प
राङ्गसाम्यमर्हस्यकथनमपवारितमिति० नाद्यधर्मप्रसंगादाकाशभाषितमाह० किंब्रवीषीत्यादि० त्यस्तोर्थः। ८६। अन्यान्यपिनाट्यधर्मत्वेनप्रथमकल्पादीनिकैश्चिदुदाहृतानि
तिनेषांचाभारतीयत्वान्नाममात्रप्रसिद्धानांकेषांचिद्देशभाषात्मकत्वान्नाट्यधर्मत्वाभावात्लक्षणंनोक्तमितिउपसंहरति० इत्याद्यशेषेति० वस्तुविभेदजातंवस्तुवर्णनीयंतस्य
विभेदजातंनानाभेदाः रामायणादिहृत्कथंचगुणाद्यनिर्मितादिभाव्यआलोच्य नयद्गुरुतरं नेत्रिति० नेनावक्ष्यमाणलक्षणः रसाश्चैवंवानानुगुण्यात्त्रिंशद्वात्रिंशत्कथा

त्रिपताकाकरेणान्यानपवार्यान्तराकथा० अन्योन्यामंत्रणंयत्स्यात्तज्जनांतेजनांतिकं० ८५। रहस्यंकथ्यतेन्यस्य
पराङ्गसापवारितं० किंब्रवीष्येवमित्यादिविनापात्रंब्रवीतियत्० श्रुत्वेवानुक्तमप्येवंतत्स्यादाकाशभाषितं० ८६। इत्या
द्यशेषमिहवस्तुविभेदजातं रामायणादिचविभाव्यबृहत्कथांच आसूत्रयेत्तदनुनेतृरसानुगुण्याच्चित्रांकथा
मुचितचारुवचः प्रपंचैः ८७॥ ॥इतिदशरूपकालंकारेप्रथमउद्योतः॥ ॥१॥

मारव्यापिकांचाकल्पितांपरिनिबद्धांमिनेषांप्रबंधैः विंशत्यैवासवयेन अनुग्रथयेत् नत्रबृहत्कथामूलंमुद्राराक्षसं० चाणक्यनाम्नानेनाथशकटदासगृहेरहः। मुसंविधायसमानुतान्
पुत्रोपिहतोनवपत्यः योगानंदेयशःशेषेपूर्वनंदसुतस्ततः। चंद्रगुप्तःकृतोराज्ञेचाणक्येनमहौजसेमिद्र हत्कथायांसूचितेश्रीरामायणोक्तरामकथादिकल्पनंतुवीरचरित्रा
दि० आदिपदाद्भरतसाधुमानुष्यंतशकुंतलादिकथामूलंतन्मभिज्ञानशकुंतलादि०॥ ॥इतिश्रीदशरूपकावलोकेधनिककृतौनाटकांगव्याख्यानंनामप्रथमःप्रकाशः॥ १॥

द्वि०व०

१९

एवंरूपाणामन्योन्यभेदसिद्धये वस्तुभेदं प्रतिपाद्येदानीं नायकभेदः प्रतिपाद्यते· नेनेत्यादि श्लोकद्वयेन· नेता नायकः विनयादिगुणसंपन्नो भवति· तत्र विनीतो यथा· यत्कूलवादिभिरुपासित
वंद्यपादैर्विघातपोवृत्तनिधौनपसांवरिष्ठैः दैवाल्लनस्तवपि ममुयाविनयापचारस्तत्र प्रसीद भगवन्नयमंजलिस्ते· मधुरः प्रियदर्शनः स यथा· रामरामनयनाभिरामननामायस्य सद्द
शीसमुद्वहन्तः अपर्कामुगणनामणीयकः सर्वथैव हृदयंगमोऽसि मे· त्यागी यथा· कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः ददौ दधीचिरस्थीनि नास्त्यदेयं महात्मनां· दक्षः क्षिप्रका
री यथा· स्फूर्जद्वज्रसहस्रनिर्मितमिव प्रादुर्भवत्यग्रतो रामस्य त्रिपुरान्तकृद्दिविषदां तेजोभिरिद्धं धनुः· शुंकारः कलभेन यद्वच्चलेवत्सेन दोर्दण्डकस्तस्मिन्नाहित एव गर्जित
गुणं दृष्टं च भग्नं च तत्· प्रियंवदो यथा· उत्पत्तिर्जमदग्नितः स भगवान्देवः पिनाकी गुरुर्वीर्यं यत्तु न तद्गिरां पथि ननु व्यक्तं हि तत्कर्मभिः· त्यागः सप्तसमुद्रमुद्रितमही निर्व्याज

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः· रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा·१· बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः· शूरो दृ
ढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः·२· भेदैश्चतुर्धा ललितशान्तोदात्तोद्धतैरयं·

दानावधिः सत्यसंभूतलनपोनिधेर्भगवतः किं किं न लोकोत्तरं· रक्तलोको यथा· त्रय्यास्त्राता यस्तवायं तनूजस्तेनैवाद्य स्वामिनस्ते प्रसादात् राजन्वत्सो नाम भद्रेण राज्ञा प्राक् दंसः पूर्ण
कामाश्चरेम· एवं शौचादिष्वप्युदाहार्यं· तत्र शौचं मनोनैर्मल्यादि कामाद्यनभिभूतत्वं· यथा रघोः षोडश सर्गे· का त्वं शुभे कस्य परिग्रहो वेत्यादि· वाग्मी यथा· बाह्वोर्बलं न विदितं न च का
र्मुकस्य त्रैयंबकस्य तनिमा तत एष दोषः· तच्चापलं परशुराम मम क्षमस्व डिंभस्य दुर्विनि— —पुरोगुरूणां· रूढवंशो यथा· ये चत्वारो दिनकरकुलक्षत्रसंतानमल्लीमालाम्लाननव
वकमधुपा जज्ञिरे राजपुत्राः· रामस्तेषामचरमभवस्ताटकाकालरात्रिप्रत्यूषोऽयं सुचरितकथाकंदलीकंदमूलः· स्थिरो वाङ्मनःक्रियाभिरचंचलः· यथा· प्रायश्चित्तं करिष्यामि
पूज्यानां वो व्यतिक्रमात्· न त्वेवं दूषयिष्यामि शस्त्रग्रहमहाव्रतं· यथा वा· आरभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता विरमंति मध्याः· विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रार
भ्यमुत्तमगुणा न परित्यजंति· युवा प्रसिद्धः·१· बुद्धिमान् इति· बुद्धिर्ज्ञानं· गृहीतविशेषकरी तु प्रज्ञा· यथा तत्प्रयोगविषये भाविकमुपक्षिप्यते न मया तत्सौ· तत्राद्यो विशेषकरणात्प्रत्युपदिश्यती वेमेवा त्वा· स्वच्छमन्यत्· अथ नेतृविशेषानाह· भेदैरिति·

यथोद्देशं लक्षणमाह· निश्चिंत इति· सचिवादिसंविहितयोगक्षेमत्वाच्चिंतारहितः। अत एव गीतादिकलाविष्टो भोगप्रवणश्च· शृंगारप्रधानत्वाच्च सुकुमारसत्वाचारो मृदुरिति· यथा रत्ना
वल्यां वत्सराजः। राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः। प्रद्योतस्य सुता वसंतसमयस्त्वं चेति नाम्ना धृतिं कामः
काममुपैत्वयं मम पुनर्मन्ये महानुत्सवः। [redacted] अथ धीरशांतः। सामान्येति· विनयादिनेतृसामान्यगुणयोगी धीरशांतो द्विजादिक इति विप्रवणिक्सचिवादीनां प्रकरणनेतॄ
णामुपलक्षणं [redacted] विवक्षितं चैतत्· तेन नैश्चिंत्यादिगुणसंभवेपि विप्रादीनां शांततैव न लालित्यं· यथा मालतीमाधवे मकरंदकादिकादौ माधववचः कृत्वा नादिः· यथा· ततउ
दयगिरेरिवैक एव स्फुरितगुणद्युतिसुंदरः कलावान्· इह जगति महोत्सवस्य हेतुर्नयनवतामुदियाय बालचंद्रः। यथा वा· मखशतपरिपूतं गोत्रमुद्भासितं यत्सदसि निबिडचै
त्यब्रह्मघोषैः पुरस्तात्· मम निधनदशायां वर्तमानस्य पापैस्तदसदृशमनुष्यैर्घुष्यते घोषणायां। ३। अथ धीरोदात्तः। महासत्व इति· महासत्वः शोकक्रोधाद्यनभिभूतांतःकरणः अ

निश्चिंतो धीरललितः कलासक्तः सुखी मृदुः। सामान्यगुणयुक्तस्तु धीरशांतो द्विजादिकः। ३। महासत्वोतिगंभीरः क्षमावानविकत्थनः। स्थिरो
निगूढाहंकारो धीरोदात्तो दृढव्रतः॥४॥ ॥

विकत्थनो नात्मश्लाघनः। निगूढाहंकारो विनयच्छन्नावलेपः। दृढव्रतोंगीकृतनिर्वाहकः। यथा जीमूतवाहनः। शिरामुखैः
स्यंदत एव रक्तमद्यापि देहे मम मांसमस्ति· तृप्तिं न पश्यामि तवापि तावत्किं भक्षणात्त्वं विरतो गरुत्मन्· यथा वा रामं प्रति· आहूतस्याभिषेकाय विसृष्टस्य वनाय च· न मया लक्षितस्तस्य स्वल्पो
प्याकारविभ्रमः। यत्तु कथं चिन्त्यैर्यादिसामान्यगुणानामपि विशेषलक्षणे कीर्तनं तत्तेषां तत्राधिक्यप्रतिपादनार्थं· ननु च कथं जीमूतवाहनादिर्नागानंदादावुदात्त इत्युच्यते·
औदात्त्यं हि नाम सर्वोत्कर्षेण वृत्तिः तच्च विजिगीषुत्व एवोपपद्यते· जीमूतवाहनस्तु निर्जिगीषुतया कविनैव प्रतिपादितः। तिष्ठन्भाति पितुः पुरो भुवि यथा सिंहासने किं तथा यत्संवा
ह्यमानः सुखं किं व्यवहारणोद्भूतस्य किं राज्यके· किं भुक्ते भुवनत्रये धृतिरसौ भुक्तोज्झिते या गुरोरायासः खलु राज्यमुज्झितगुरोस्तन्नास्ति कश्चिद्गुणः इत्यादिना· पित्रोर्विधातुं शुश्रूषां त्यक्त्वैश्व
र्यं क्रमागतं· वनं याम्यहमप्येष यथा जीमूतवाहनः इत्यादिना च· अतोस्यात्यंतशमप्रधानत्वात्परमकारुणिकत्वाच्च वीतरागवच्छांतता· अन्यच्चात्रायुक्तं· यत्तथाभूतं राज्यसुखतो [redacted]

अत्रोच्यते· यत्तावदुक्तं सर्वोत्कर्षेण वृत्तिर्धीरोदात्त इति तन्न जीमूतवाहनादौ परिहीयते· न ह्येकरूपैव विजिगीषुता· येन केनापि शौर्यत्यागदयादिनान्यानतिशेते स विजिगीषुर्न तु यः परापकारे
ण्णार्थग्रहणादिप्रवृत्तः सोपि· तथात्वे च मार्गदूषकादेरपि धीरोदात्तत्वप्रसंगः· रामादेरपि जगत्पालनीयमिति दुष्टनिग्रहे प्रवृत्तस्य नांतरीयकत्वेन भूम्यादिलाभो जीमूतवाहना
21 दिस्तु प्राणैरपि परार्थसंपादनाद्विश्वमतिशेते इत्युदात्ततमः· यच्चोक्तं निष्प्रत्यूहमानीतादिना विषयसुखपराङ्मुखतेति तत्सत्यं· कार्पण्यहेतुषु स्वसुखतृष्णासु निरभिलाष एव· यथा
भिज्ञानशाकुन्तले· स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः प्रतिदिनमथवा ते वृत्तिरेवंविधैव· अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं शमयति परितापं छाययोपाश्रितानामिति· म
लयवत्यनुरागोपवर्णनं तु शान्तनायकत्वमस्तु न निषेधति· शान्तत्वं चानहंकृतत्वं तच्च विप्रादेरौचित्यप्राप्तमिति वस्तुस्थित्या विप्रादेः शान्तता न स्वपरिभाषामात्रेण· बुद्ध
जीमूतवाहनयोस्तु कारुणिकत्वाविशेषेपि सकामनिष्कामकृतो धर्मवीरभेदः· अतो जीमूतवाहनादेर्धीरोदात्तत्वमिति·॥ अथ धीरोद्धतः· दर्पेति· दर्पः शौर्यादिजन्य उत्सेकः· मात्सर्यमसहनता· मन्त्रब

दर्पमात्सर्यभूयिष्ठो मायाछद्मपरायणः। धीरोद्धतस्त्वहंकारी चलश्चण्डो विकत्थनः॥५॥

लेनाविद्यमानवस्तुप्रकाशनं माया· छद्म वंचनमात्रं· चलो ऽनवस्थितः। चण्डो रौद्रः। स्वगुणशंसी विकत्थनः· धीरोद्धतो भवति· यथा रावणः। त्रैलोक्यैश्वर्यलक्ष्मीहठहरणसहा बाहवो रावणस्येति· यथा वा
जामदग्न्यः· कैलासोद्धारसारत्रिभुवनविजयेत्यादि· धीरललितादिशब्दाश्च यथोक्तगुणसमारोपितावस्थाभिधायिनो वत्सराजमहोक्षादिवदनुजातकाव्यावस्थितरूपाः सन्ति· तथात्वे च महा
कविप्रबन्धेषु विरुद्धानेकरूपाभिधानमसंगतमेव स्यात्· जातेरनपायित्वात्· तथा च भवभूतिनैक एव जामदग्न्यो ब्राह्मणातिक्रमत्यागो भवतां भवभूतये· जामदग्न्यस्तथा मित्रमन्यथा दुर्मनाय
त इत्यादिना रावणं प्रति धीरोदात्तत्वेन कैलासोद्धारसारेत्यादिभिश्च रामादीन्प्रति प्रथमं धीरोद्धतत्वेन पुनः पुण्या ब्राह्मणजातिरित्यादिभिर्धीरशान्तत्वेनोपवर्णितः· न चावस्थान्तराभिधानमनु
चितं· अंगभूतनायकानां नायकान्तरापेक्षया महासत्त्वतादेरनवस्थितत्वादंगिनस्तु रामादेरेकप्रबन्धोपात्तान्नैकरूपत्वादारम्भावस्थायास्तावदवस्थानतो ऽवस्थान्तरोपादानमन्याय्यं· यथोदात्तत्वे
नाभिमतरामस्य छद्मना वालिवधान्महासत्त्वतायाः आद्यावस्थायाः परित्याग इति· वक्ष्यमाणानां च दक्षिणाद्यवस्थानां पूर्वां प्रत्यन्यया हृतत्वेन नायकत्वेनाविर्भावाद्दुदात्ताद्यवस्थानां वस्थान्तराभि

रुद्रकूपक